# अनुसंधान

मोहरिते सच्चवयणस्स पलिमंथू ( ठाणंगसूत्त, ५२९ ) 'मुखरता सत्यवचननी विघातक छे'

प्राकृतभाषा अने जैन साहित्य विषयक
संपादन, संशोधन, माहिती वगेरेनी पत्रिका

१४

संकलनकार : आचार्य विजयशीलचन्द्रसूरि • हरिवल्लभ भायाणी



श्री हेमचंद्राचार्य

कलिकालसर्वज्ञ श्री हेमचन्द्राचार्य नवम जन्मशताब्दी
स्मृतिसंस्कार शिक्षणनिधि

अहमदाबाद
१९९९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोहरिते सच्चवयणस्स पलिमंथू (ठाणंगसुत्त, ५२९)
'मुखरता सत्यवचननी विघातक छे.'

# अनुसंधान

**प्राकृतभाषा अने जैन साहित्य विषयक**
**संपादन, संशोधन, माहिती वगेरेनी पत्रिका**

**१४**

संपादको : **विजयशीलचन्द्रसूरि**
**हरिवल्लभ भायाणी**



श्री हेमचंद्राचार्य

**कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम जन्मशताब्दी**
**स्मृति संस्कार शिक्षणनिधि**
**अहमदाबाद**
**ओगस्ट १९९९**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# *अनुसंधान १४*

संपर्क : हरिवल्लभ भायाणी
२५-२, विमानगर, सेटेलाईट रोड,
अहमदाबाद- ३८० ०१५.

प्रकाशक : कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्य नवम
जन्मशताब्दी स्मृति संस्कार शिक्षणनिधि,
अहमदाबाद, १९९९

किंमत : रू. ३५-००

प्राप्तिस्थान : सरस्वती पुस्तक भंडार
११२, हाथीखाना, रतनपोल,
अहमदाबाद - ३८० ००१

मुद्रक : राकेश टाइपो - डुप्लिकेटींग वर्क्स
राकेशभाई हर्षदभाई शाह
२७२, सेलर, बी.जी. टावर्स,
दिल्ली दरवाजा बहार,
अहमदाबाद- ३८० ००४.
(फोन : ६३०३२००)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# निवेदन

अनुसन्धान-१४, जिज्ञासुओने खासी प्रतीक्षा कराव्या पछी प्रकाशित थाय छे. अनुरूप मुद्रणव्यवस्था आ प्रकारनां प्रकाशनोने मळवी, मळ्या करवी, ते पण एक अटपटी समस्या छे. ए व्यवस्थाने अनुसरवुं ज पडे, अने तेम करवा जतां विलम्ब वेठवो ज पडे.

मुद्रणव्यवस्था करतां पण वधु गंभीर समस्या छे प्रूफवाचननी. आ प्रकारनां प्रकाशनोनी सामग्रीनां प्रूफवाचको अत्यारे भाग्ये ज मळे अने मळे तेमनी पण सज्जता केवी-केटली ते पण घणीवार न समजाय.

आवी आवी मुश्केलीओने कारणे अंक विलंबथी आपी शकाय छे, तेनो ख्याल हवे जिज्ञासुओने आवी गयो ज हशे.

सामग्रीनी दृष्टिए आ अंकमां घणुं वैविध्य तेमज वैपुल्य छे, जे ते ते विषयना अभ्यासीओने माटे रसप्रद बनी रहेशे, तेवी श्रध्धा छे.

– संपादको

**विज्ञप्ति**

पृ. १३१-१३४ गलती से बहुत अशुद्ध छप गये हैं। इस लिये हम क्षमाप्रार्थी हैं।

इस पृष्ठोंको रद्द समझे।

**संपादक**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रम


| | | | |
|---|---|---|---|
| १. | षड्दर्शन- परिक्रमः गूर्जर अवचूरि सह | सं. मुनि कल्याणकीर्तिविजय | १-१० |
| २. | अज्ञातकर्तृक बे दृष्टान्त शतको | सं. मुनि धर्मकीर्तिविजय | ११-२६ |
| ३. | अज्ञातकर्तृक समवसरणस्तोत्र | सं. आ. अरविंदसूरि | २७-३० |
| ४. | मुनि विनयवर्धनलिखित - एक विज्ञप्तिपत्र | सं. मुनि रत्नकीर्तिविजय | ३१-३७ |
| ५. | अष्ट महाप्रातिहार्यवर्णनः अपभ्रंशभाषामय आठ पद्य | सं. प्रद्युम्नसूरि | ३८-४१ |
| ६. | सोमतिलकसूरिविरचितं करहेटकपार्श्वनाथस्तोत्रम् | सं. विजयमुनिचन्द्रसूरि | ४२-४४ |
| ७. | श्री भंवरलाल नाहटा (कलकत्ता) का पत्र | | ४५-४७ |
| ८. | कविविल्हरचित-भीमछंद (अणहिलपुर) | सं. भंवरलाल नाहटा | ४८-४९ |
| ९. | वाचकश्रीसिद्धिचन्द्रगणिकृत न्यायसिद्धान्तमञ्जरी - टिप्पनक | सं. मुनि कल्याणकीर्तिविजय | ५०-६९ |
| १०. | 'चंदप्पहचरियं'नी रूपककथा | सं. सलोनी जोषी | ७०-९१ |
| ११. | सूक्तावली | सं. नीलांजना शाह | ९२-१०५ |
| १२. | कल्पसूत्रमें भद्रबाहु-प्रयुक्त 'याग' शब्द | विजयशीलचन्द्रसूरि | १०६-११२ |
| १३. | डॉ. मधुसूदन ढांकीने श्रीहेमचन्द्राचार्य चन्द्रक-प्रदानना समारोहनो तथा 'आर्य भद्रबाहु और उनका साहित्य' विषयक संगोष्ठीनो संक्षिप्त हेवाल | | ११३-११४ |
| १४. | प्रकाशन - वर्तमान | | ११५-११६ |
| १५. | टूंक नोंध :- | विजयशीलचन्द्रसूरि | ११७-११९ |
| १६. | उत्तर गुजरातनी बोलीमां वपराता केटलाक शब्दो | डॉ. रमेश आ. ओझा | १२०-१२३ |
| १६. | गुजरातीमां महाप्राण व्यंजन अल्पप्राण थवो | हरिवल्लभ भायाणी | १२४-१३७ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# षड्दर्शन-परिक्रमः गूर्जर अवचूरि सह

– सं. मुनि कल्याणकीर्तिविजय

## *भूमिका*

षड्दर्शन-परिक्रमनी आ प्रत वर्षोथी मारा परमगुरुभगवंत पू.आ. श्रीविजय सूर्योदयसूरीश्वरजी म.ना संग्रहमां हती। आगमप्रभाकर पूज्य मुनि श्रीपुण्यविजयजी महाराजे आ प्रत जोतां कहेलुं के 'आ प्रत नवीन अने अप्रकाशित छे माटे तेनुं संपादन प्रकाशन थवुं जोइए।' वर्षो पछी मारा पू. गुरुभगवंत द्वारा आ प्रत मारी पासे आवी। तेनुं यथामति संपादन करी अहीं रजू करेल छे।

नाम प्रमाणे ज आ ग्रंथमां छए दर्शननो सामान्य परिचय आपेल छे। षड्दर्शनसमुच्चयमां १. बौद्ध २. नैयायिक ३. सांख्य ४. जैन ५. वैशेषिक ६. जैमिनीय अने ७. लोकायत (नास्तिक), आ क्रमे दर्शनोनुं निरूपण थयुं छे, ज्यारे आ ग्रंथमां १. जैन २. मीमांसक ३. बौद्ध ४. सांख्य ५. शैव (न्याय-वैशेषिक) अने ६. नास्तिक आ क्रमे दर्शनोनुं निरूपण छे.। षड्दर्शनसमुच्चयना बौद्ध दर्शनना श्लोक ५ तथा ८ अने आ ग्रंथना श्लोको २३ तथा २८ समान छे। ते सिवाय पण बन्ने ग्रंथोना विषय-निरूपणमां घणुं साम्य छे. छतां आ ग्रंथमां दरेक मतना भिक्षुओनुं तथा तेमनां वस्त्र पात्र आचार व.नुं वर्णन कर्युं छे जे षड्दर्शनसमुच्चयमां नथी मळतुं।

| दर्शन | विषय | श्लोक |
|---|---|---|
| जैन | तत्त्वो, प्रमाण, श्वेतांबर - दिगंबर साधुओनी ओळख तथा दिगंबरोनी मान्यता। | २ थी १३ |
| मीमांसक | मीमांसकोना कर्म-ब्रह्म एम बे प्रकार, प्रमाण, मुक्ति नी व्याख्या तथा तेओना द्विजो व.नुं वर्णन। | १४ थी २० |
| बौद्ध | तत्त्वो, प्रमाण, तेओना ४ प्रकार तथा भिक्षुओनुं वर्णन। | २१ थी ३१ |
| सांख्य | २५ तत्त्वो, प्रमाण, मुक्तिनी व्याख्या तथा भिक्षुओ | ३२ थी ३९ |
| शैव-न्याय | प्रमाण तथा १६ तत्त्वो | ४० थी ४४ |
| वैशेषिक | प्रमाण तथा ६ तत्त्वो | ४५ थी ५४ |
| | पछी बन्नेना मते मुक्ति नी व्याख्या अने भिक्षुओनुं वर्णन छे। | ५५ थी ५८ |
| नास्तिक | मान्यता तथा प्रमाण। | ५९ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यारबाद श्लोक ६० थी ६५मां प्रत्यक्षादि दरेक प्रमाणनी तथा तत्त्व अने तत्त्वसाधक प्रमाणनी व्याख्या आपी छे अने छेल्ले ६६मा श्लोकमां कह्युं छे के रहस्य सहितनां सर्व शास्त्रो तो दूर रहो, सारी रीते शीखेलो एक अक्षर पण निष्फळ जतो नथी।

आ साथे प्रतिमां ग्रंथनो स्तबकार्थ पण जूनी गूजरातीमां आपेलो छे। अमुक स्थानोने बाद करतां प्राय : सर्वत्र आ टबो योग्य अने संगत छे। परंतु केटलांक स्थानोमां आ स्तबकार्थ असंगत जणाय छे, तेनी नोंध नीचे आपेल छे।

| श्लोक | असंगत अर्थ | संभवित संगत अर्थ |
|---|---|---|
| ३ | पुन्य-पापनइ संवरइ पुन पुनरपि कर्मबंध न करइ। | पुन्यनो संवरमां अने पापनो आश्रवमां अंतर्भाव करवो। |
| ४ | ज्ञान-दर्शन-चारित्र मोक्षनइ विषइ वर्तइ। | ज्ञान-दर्शन-चारित्र मोक्षनो मार्ग छे। |
| २१ | एहनइ च्यारि दर्शनना प्रवर्तावक हूआ। अनुक्रमइ आर्य सत्य आख्याय अने तत्त्व। | बौद्धोना चार तत्त्वो आर्यसत्य ए नामे प्रसिद्ध छे। ते आ प्रमाणे। |
| ६० | नास्तिक अनुमानना त्रण अंग कहइ (व.)। | अनुमिति लिंगथी थाय, जेम धूमथी अग्निनी अनुमिति। |
| ६१ | नास्तिक शेष थाकती सिद्धि जे ते सामान्याकारि कहइ (व.)। | अनुमानना त्रण प्रकार छे : पूर्व, शेष, सामान्य। (साथे तेना उदाहरण पण छे) |
| ६२ | सामान्य प्रकारि विख्यात हुइ ते साध्य ओपमाइ करी देखाडीयइ ते साधन | साध्य-साधन सामान्यथी कह्या छे. उपमा आ प्रमाणे छे। |

आना लीधे कल्पी शकाय छे के मूळ ग्रंथ तथा टबाना कर्ता जुदा जुदा छे.

श्लोक ३१मां आवता मौण्ड्य शब्दनो अर्थ टबाकारे 'मस्तकि **सद्र** करावइ' एवो कर्यो छे। आ **सद्र** शब्दनो प्रयोग नोंधपात्र छे।

प्रतनो परिचय : षड्दर्शनपरिक्रमनी आ प्रत पंचपाठी छे। तेनुं लेखन सं. १६३६मां श्रीमालपुरमां थयेलुं छे। अने तेना लेखक (मुनि) **समयकलश** छे। प्रतिनी शुद्धि सारी छे तथा अक्षरो सुवाच्य छे। कुल पत्रो ३ छे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूळ कृतिना कर्ता विषे आमां कोइ निर्देश प्राप्त नथी थतो । अवचूरिना कर्ता संभवतः प्रतिना लेखक मुनि समयकलश होय एवुं लागे छे; जो के तेनो पण स्पष्ट निर्देश तो नथी ज मळतो ।

अज्ञातकर्तृक

# षड्दर्शनपरिक्रम

गूर्जर अवचूरि सह

जैन मैमांसकं बौद्धं साङ्ख्यं सै(शै)वं च [1]नास्तिकम् ।
[2]स्वं स्वं च तर्कभेदेन जानीयाद(द्द)र्शनानि षट् ॥१॥
बल-भोगोपभोगानामुभयोर्दान-लाभयोः ।
अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सनम् ॥२॥
हासो रत्यरती राग द्वेषाववव(वि)रति[:]स्मरः ।
शोको मिथ्यात्वमेतेऽ[3]ष्टादश दोषा न यस्य सः ॥३॥
जिनो देवो गुरुः [4]सम्यक् तत्त्वज्ञानोपदेशकः ।
ज्ञान[5]-दर्शन-चारित्राण्यपवर्गस्य वर्त्तिन (वर्त्तनी) ॥४॥
स्याद्वादश्च प्रमाण[6] द्वे प्रत्यक्षं [7]चो(च) परोक्षकम् ।
नित्यानित्या(त्यं) जगत् सर्वं नव तत्त्वानि सप्त वा ॥५॥
जीवाजीवौ पुण्यपापे आश्रवः संवरोऽपि च ।
बन्धो निर्जरणं मुक्तिरेषां व्याख्याऽधुनोच्यते ॥६॥
चेतनालक्षणो जीवः स्यादजीवस्तदन्यकः ।
सत्कर्मपुद्गलाः पुण्यं पापं तस्य विपर्ययः ॥७॥

---

१. नास्तिकं; चार्वाकम् । २. पोतानी(ना) पोताना विचार तेणइ करी ऊपनउ जे भेद तिणइ करी षट् दर्शन जाणिवा । ३. एहवा जे अढार दोष रहित ते जैन देव । ४. सत्य जे तत्त्वज्ञान तेहनउ उपदेश दीयइ ते गुरु । ५. ज्ञान दर्शन चारित्र मोक्षनइ विषइ वर्तइ (?) । ६. प्रमाण दोइ-प्रत्यक्ष, अनुमान; ज्ञाननूं कारण कहतां उपजावीयइ जेणइ करी अन्य अन्य करीयइ ते प्रमाण विजाणिवा। ७. **मनुमाऽपि** च । द्वितीय(?)पाठान्तरम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आश्रव: कर्मसम्बन्ध: कर्मरोधस्तु संवर: ।
कर्मणां बन्धनाद् बन्धो [१]निर्जरा तद्वियोजनम् ॥८॥
[२]अष्टकर्मक्षयान्मोक्षोऽप्यन्तर्भावश्च कश्चन ।
[३]पुण्यस्य संवरे पापस्याऽऽश्रवे क्रियते पुन: । ॥९॥
[४]लब्धानन्तचतुष्कस्य लोकाग्रस्थस्य चाऽऽत्मन: ।
[५]क्षीणाष्टकर्मणो मुक्तिरव्यावृत्तिर्जिनोदिता ॥१०॥
[६]सरजोहरणा भैक्ष्यभुजो [७]लुञ्चित[८]मूर्द्धजा: ।
**श्वेताम्बरा:** क्षमाशीला: निस्सङ्गा जैनसाधव: ॥११॥
लुञ्चिता: पिच्छकाहस्ता: पाणिपात्रा **दिगम्बरा:** ।
[९]ऊर्ध्वाशिनो गृहे दातुर्द्वितीया: स्युर्जिनर्षय: ॥१२॥
[१०]भुङ्क्ते न केवली न स्त्री मोक्षगेति दिगम्बरा: ।
प्राहुरेषामयं भेदो महान् श्वेताम्बरै: समम् ॥१३॥ इति **जैनम्** ॥
**मीमांसकौ** द्विधा **कर्म-ब्रह्ममीमांसक**स्तत: ।
**वेदान्ती** [११]मन्यते ब्रह्म कर्म [१२]**भट्ट-प्रभाकरौ** ॥१४॥
प्रत्यक्षमनुमानं च वेदाश्चोपमया सह ।
अर्थापत्तिरभावश्च [१३]**भट्टानां** षट्प्रमाण्यसौ[१४] ॥१५॥
**प्रभाकरमते** पञ्च तान्येवाऽभाववर्जनात् ।
अद्वैतवादी [१५]**वेदान्ती** प्रमाणं[१६] तु यथा तथा ॥१६॥

---

१.कर्म छूटीयइ ते निर्जरा। २.आठ कर्म क्षय थकी मुक्ति होइ ते मुक्ति नउ लक्षण केहवउ; एक लीनभाव। ३.पुन्यपापनइ संवरइ पुन-पुनिरपि कर्मबंध न करइ(?)। ४.अनंतज्ञान-अनंतदर्शन-चारित्र-सुखलक्षणानि चत्वारि, एहवा ४ अनंत पामइ पछइ आत्मा लोकाग्रकइ विषइ रहइ। ५.क्षीणाष्टकर्मनइ मुक्ति होइ; अपुनरावृत्ति जेनइ कही। ६. रजोहरण साथइ लीधइ चालइ। ७. भिक्षायइ जिमइ। ८.लोच करइ। ९. दाताना घरकइ विषइ ऊभा रही जिमइ। १०. दिगंबर कहइ-स्त्रीनइ मुक्ति नही, केवलीनइ भुक्ति नही, श्वेतांबरसुं मोटउ भेद-जूजूआ। ११.वेदांती उत्तरमीमांसाना जाण ते ब्रह्मनइ मानइ।१२. भट्टाचार्य अनइ प्रभाकर तेहनउ शिष्य ए बन्नइ कर्मनइ मानइ। १३.भट्टाचार्य छ प्रमाण करी अर्ध(र्थ) सिद्ध मानइ; उत्तरमीमांसाना जाण। १४. षण्णां प्रमाणानां समाहार: षट्प्रमाणी। भट्टाचार्यनइ छविध प्रमाण नेत्रनिर्धार ते प्रत्यक्ष(१) वेगला थकी संदेह आणी वस्तु निर्धार कीजइ ते अनुमान(२) वेदोक्त ते प्रमाण(३) उपमा देइने निर्धार कीजइ सु उपमा प्रमाण(४) अणघटनइ घटावी निर्धार कीजई ते अर्थापत्ति ते किम गृहस्थनइ अति आनंदादिकई करी धर्म निर्धारीयइ-इत्यादि अर्थापत्ति प्रमाण(५) अभाव ते कहीयइ जे एक ठामि अछतइ बीजइ ठामि कीजइ छती-ते किम-इहां घट नथी बीजइ ठामि छतउ कीधउ इत्यादि ते अभावप्रमाण(६)। १५. वेदांती एक ब्रह्मनइ मानइ। १६. छ प्रमाणमांहि जेहनउ प्रस्ताव हुइ तेणइ प्रमाणि करी अर्थसिद्धि मानइ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]सर्वमेतदिदं ब्रह्म वेदान्तेऽद्वैतवादिनाम् ।
[2]आत्मन्येव लयो मुक्तिर्वेदान्तिकमते मता ॥१७॥
[3]अकुकर्मा सषट्कर्मा [4]शूद्रान्नादिविवर्जकः ।
[5]ब्रह्मसूत्री द्विजो भट्टो गृह[6]स्थाश्रमसंस्थितः ॥१८॥
[7]भगवन्नामधेयास्तु द्विजा वेदान्तदर्शने ।
[8]विप्रगेहभुजस्त्यक्तोपवीतादव्र(ता ब्र)ह्मवादिनः ॥१९॥
[9]चत्वारो भगवद्भेदाःकुटीचर-बहूदकौ ।
हंसः परमहंसश्चाऽ[10]धिकोऽमीषु परः परः ॥२०॥ **मीमांसकः॥**

**अथ बौद्धम् ॥**

**बौद्धानां**[11] सुगतो देवो विश्वं[12] च क्षणभङ्गुरम् ।
[13]आर्यसत्याख्यया तत्त्व[14]चतुष्टयमिदं क्रमात् ॥२१॥
दुःखमायतनं चैव ततः समुदयो मतः ।
मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः ॥२२॥
[15]दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः ।
विज्ञानं वेदना सञ्ज्ञा संस्कारो रूपमेव च ॥२३॥

अथाऽऽयतनानि - पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम् ।
धर्मायतनमेतानि द्वादशाऽऽयतनानि तु ॥२४॥

अथ समुदयः- रागादीनां गणो यस्मात् समुदेति नृणां हृदि ।
आत्मा(त्मना)ऽऽत्मीस्वभावाख्यः स स्यात् समुदयः पुनः ॥२५॥

---

१. सर्व प्रपंच ब्रह्म-एहवउ वेदांतीन अद्वैतवाद । २.परमात्मा नइ विषइ लीन ते वेदांतीनइ मनइ मुक्ति । ३.भट्ट नइ कुत्सितकर्म न करइ अनइ षट्कर्म करइ । ४.शूद्रादिकनइ घरि अन्न न जिमइ, एतलइ ब्राह्मणनइ अन्नइ जीवइ । ५. ब्रह्मसूत्री कहता जनोई पहिरइ अनइ ब्रह्मयुक्त हुइ, विद्वांस हुइ । ६. गृहस्थाश्रमइ रहइ । ७. वेदांतदर्शनइ भगवन एहवउ नामधेय । ८. ब्राह्मणनइ घरि जिमइ अनइ जनोई छांडइ अनइ परमात्मानइ मानइ । ९. ते भगवनना ४ भेद मठ मांडी रहइ ते कुटीचर(१) मठरहित ते बहूदक(२) सर्वसंग मूकइ ते हंस(३) दिगंबर ते परमहंस(४) । १०.एतइ चडती चडती क्रिया जाणिवा । ११. बौद्धनइ सुगत एहवइ नामइ देव कहेतां परमेश्वर । १२. सर्व क्षणमांहिइ पलटातुं मानइ । १३. एहनइ च्यारि दर्शनना प्रवर्त्तावक हूआ अनुक्रमइ आर्य(१) सत्य(२) आख्याय(३) तत्त्व(४) ४ जाणिवा । १४. एहना शास्त्रनइ विषइ ४ नउ निरूपण एक दुःख(१) आयतन(२) समुदय(३) मार्ग(४) । १५.संसारी जीवनइ ५ स्कन्ध दुःख कहीयइ । ते केहा-एक विशेषज्ञान(१) बीजुं सदुःखानुभव(२) आहारादि संज्ञा(३) संस्कारो-कर्म वासना(४) रूप-शुक्लादि (५) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ मार्गः- [१]क्षणिकाः सर्वसंस्काराः इति या व(वा)सना स्थिरा ।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ॥२६॥
[२]प्रत्यक्षमनुमानं च प्रमाणद्वितयं पुनः।
चतुः[३]प्रस्थानका बौद्धाः ख्याता **वैभाषिकादयः** ॥२७॥
अर्थो ज्ञानान्वितो **वैभाषिकेण**[४] बहुमन्यते ।
**सौत्रान्तिकेण**[५] प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः ॥२८॥
आकारसहिता बुद्धि**र्योगा**[६]**चारस्य** सम्मता ।
केवलं संविदं स्वस्थां मन्यन्ते **मध्यमाः**[७] पुन ॥२९॥
रागादि[८]ज्ञानसन्तानवासनोच्छेदसम्भवा ।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्तिता ॥३०॥
[९]कृत्तिः [१०]कमण्ड[११]लुर्मौण्ड्यं[१२] चीरं[१३] पूर्वा[१४]ह्णभोजनम् ।
[१५]सङ्घो रक्ताम्बरत्वं[१६] च शिश्र[१७](श्रि)ये बौद्धभिक्षुभिः ॥३१॥

**अथ साङ्ख्यम्** ॥

[१८]साङ्ख्ये देवः शिवः कैश्चिन्मत्तो(तो) नारायणः परैः ।
उभयो[१९][:] सर्वमप्यन्यत्तत्त्वप्रभृतिकं समम् ॥३२॥
स(सा)ङ्ख्यानां[२०] स्युर्गुणाः सत्त्वं रजस्तम इति त्रयः ।
साम्यावस्था[२१] भवे(व)त्येषां त्रयाणां प्रकृतिं(तिः) पुनः ॥३३॥

---

१. बौद्धनइ मार्ग-सर्व क्षणिक क्षणभंगुर-एहवी जेहनी बुद्धि स्थिर एहने मार्ग, एतलुं जाण्यइ मोक्ष कहीयइ । २. प्रत्यक्ष अनइ अनुमान प्रमाण करी वस्तुनी सिद्धि करइ । ३. बिहु शास्त्रना प्रवर्तावक ४(च्यारि) वैभाषिकादि शिष्य छइ । ४. वैभाषिक तेहवुं मानइ-पदार्थनइ ज्ञान एक मानइ । ५. सौत्रांतिक ते प्रत्यक्ष तेहज अर्थ पदार्थ मानइ अनइ अप्रत्यक्ष स्वर्ग, नरकादि न मानइ। ६. योगाचार ते बुद्धिनइ आकार मानइ-एतइ घटादि सर्व बुद्ध्याकार। ७. मध्यम ते केवल जे ज्ञान तेहनइ आत्मस्थित मानइ, चिहुं बुद्धिनइ मुक्ति एह परिनी मानइ । ८. राग-द्वेषादि तेहनूं जे जाणपणूं तेहनउ जे संमोह तेहनी वासना कहेतां संस्कार तेहनउ उच्छेद कहेतां नाश तेह थकी ऊपनी मुक्ति कहइ च्यारि बौद्ध । ९. **बौद्धाण्डभाजनम्** । द्वितीयपाठः । १०. अथ बौद्धना भिक्षु कहइ छइ । कृ त्ति चर्मपरिधान । ११. उदक पात्र कमण्डलु । १२. मस्तकि सद्र करावइ । १३. वाकल-वृक्ष त्वचा परिहइ ।१४. बिहुं पहुरामाहि जिमइ । १५. संघाडइ हींडइ । १६. वली राता वस्त्र पहिरइ । १७. बौद्धना भिक्षु एहवा वेस आश्रइ । १८. सांख्यभेद कहइ-एक सांख्य शिवनइ मानइ, केहा एक नारायणनइ मानइ । १९. बिन्हइ तत्त्व २४ ज मानइ । २०. सांख्यनइ त्रीनि गुण छइ-एक सत्त्व(१)रज(२) तम(३) । २१.ए तिन्हि गुणनी समी अवस्था तेहनइ प्रकृति कहइ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]प्रकृ[2]तेश्च [3]महांस्तावदहङ्[4]कारस्ततोऽपि च ।
पञ्च[5] बुद्धीन्द्रियाणि स्युश्चक्षुरादीनि पञ्च च ॥३४॥
कर्मेन्द्रि[6]याणि वाक्-पाणिचरणोपस्थ-पायवः ।
[7]मनश्च पञ्च तन्मात्राः[8] शब्द(ब्दो) रूपं रसस्तथा ॥३५॥
स्पर्शो गन्धोऽपि तेभ्यः स्यात् पृथ्व्याद्यं[9] भूतपञ्चकम् ।
[10]इयं प्रकृतिरेतस्यां[11] परस्तु पुरुषो मतः ॥३६॥
पञ्च[12]विंशतितत्त्वीयं नित्यं साङ्ख्यमते जगत् ।
[13]प्रमाणत्रितयं चाऽत्र प्रत्यक्षमनुमाऽऽगमः ॥३७॥
यदे(दै)व ज्ञायते भेदः प्रकृते(:) पुरुषस्य च ।
मुक्तिरुक्ता तदा साङ्ख्यैः ख्यातिः सैव च भण्यते ॥३८॥
साङ्ख्यः [14]शिखी [15]जडी [16]मुण्डी [17]कषायाद्यम्बरोऽपि च ।
वेषे[18] नी(नाऽऽ)स्थैव साङ्ख्यस्य पुनस्तत्त्वे महाग्रहः ॥३९॥ **साङ्ख्यम्** ॥

**अथ शैवम्** ॥ शैवस्य[19] दर्शने तर्कावुभौ **न्याय-विशेषकौ** ।
न्याये[20] षोडशतत्त्वी स्यात् षट्तत्त्वी च विशेषकै[21]:(के) ॥४०॥
[22]अन्योन्यतत्त्वान्तर्भावात् द्वयोर्भेदोऽस्ति नाऽस्ति वा ।
द्वयोरपि शिवो देवो नित्य(:) सृष्ट्यादिकारकः ॥४१॥
**नैयाकानां**[23] चत्वारि प्रमाणानि भवन्ति च ।
प्रत्यक्षमागमोऽन्यश्चाऽनुमानु(न) मुपमाऽपि च ॥४२॥

---

१. हिवइ चउवीस तत्त्व कहइ छइ २. एक प्रकृति (१) अनइ प्रकृतिथी उपन इ ३. महत(त्त)त्त्व(२) ४. अहंकार (३) ५. चक्षु आदि पांचबुद्धें(ध्दीं)द्रिय (४-८)। ६. पांच कर्मेन्द्रिय एक वाणी, हाथ, चरण, गुह्यनइ गुद एवं (९-१३) १३ । ७. मन (१४) । ८. अनइ पांच तन्मात्रा एक शब्द, रूप, रस, स्पर्श, गंध ए पांच एवं (१५-१९ । ९. अनइ पृथ्व्यादि पांच भूत एवं (२०-२८) । १०. एवं २४ तत्त्वे प्रकृति कहीयइ। ११. तेथी अलगउ ते पुरुष कहेता परमेश्वर १२. सांख्यनइ चउवीस तत्त्व पंचवीसमउ परमेश्वर, तिणइ करी जगत मानइ । १३. प्रमाण त्रिन्हि मानइ एक प्रत्यक्ष (१) अनुमान(२) अनइ वेद(३) । १४. अथ सांख्यना भिक्षु कहइ छइ एक शिखा रखावइ (१) १५. एक वधारइ (२)। १६. एक मूंडावइ (३) । १७. लूगडां कषायांबर पहिरइ । १८. अमुकइ ज वेषि हींडइं एहवी आस्था नही, अनइ तत्त्वनइ विषइ निरूपण घणु करइ । १९. शैवदर्शनी शैवदर्शनकइ विषइ वितर्क छइ, एक न्यायशास्त्र छइं (१) बीजुं विशेषशास्त्र छइ(२) । २०. ज्ञा(न्या) यनइ विषय १६ पदार्थ छइ । २१. विशेष नइ विषय छ पदार्थ छइ । २२. परस्परइ तत्त्वनउ अंतर्भाव कीधउ छइ; एतलइ सोलनइ विषय षट्, षट्नइ विषइ १६ । सोल मानइ ते ६ न थापइ, छ थापइ ते १६ न थापइ । २३. एणि चिहुं प्रमाणे करी पदार्थनी सिद्धि करइ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अथ तत्त्वानि**-प्रमाणं[1] च प्रमेयं च[2] संशयश्च[3] प्रयोजनम्[4]।

दृष्टान्तोऽप्यथ[5] सिद्धान्ता[6]वयवौ[7][8] तर्क - [9]निर्णयौ ॥४३॥

[10]वादो [11]जल्पो [12]वितण्डा च [13]हेत्वाभासच्छलानि[14] च।

[15]जातयो निग्रहस्थानानीति[16] तत्त्वानि[17] षोडश ॥४४॥

[18]**अथ वैशेषिकम्**-वैशेषके मते तावत्[19] प्रमाणत्रितयं भवेत्।

प्रत्यक्षमनुमानं च तार्त्तीयकमथाऽऽगमः ॥४५॥

[20]द्रव्यं[21] [22]गुणस्तथा[23] कर्म सामान्यं सविशेषकम्।

समवायश्च षट्तत्त्वी तद्व्याख्यानमथोच्यते ॥४६॥

द्रव्यं नवविधं प्रोक्तं पृथ्वी-जल-वह्नयस्तथा।

पवनो गगनं कालो दिगात्मा मन इत्यपि ॥४७॥

नित्यानित्यानि[24] चत्वारि कार्यकारणभावतः।

मनो-दिग्(क्) काल आत्मा च व्योम नित्यानि पञ्च तु ॥४८॥

**अथ गुणाः**-स्पर्शो रूपं रसो गन्धः सङ्ख्याऽथ परिमाणकम्।

[25]पृथक्त्वमथ संयोग[26]: विभागोऽथ[27] परत्र[28](त्व)कम् ॥४९॥

[29]अपरत्वं बुद्धिसौख्ये (दुःखे)[30]च्छे द्वेष-यत्नकौ[31] ।

धर्मा-धर्मौ च संस्कारा[32] गुरु[33](त्वं) द्रव[34] इत्यपि ॥५०॥

---

१. चिहुं प्रमाणे एक पदार्थ(१)। २. दृश्य पदार्थ ते प्रमेय(२)। ३. इम ए हुइ कि न हुइ तेहनउ निर्णय(३)। ४. अर्थसिद्धि (४)। ५. दृष्टांतइ करी प्रीछवीयइ ते (५)। ६. सिद्धांतनिश्चय(६) ७. अंशइ करीनइ पदार्थसिध्दि (७) ८. विचार(८)। ९. निर्णय(९)। १०. तत्त्वविचारनी वार्ता ते वाद(१०)। ११. उत्तमकथा ते जल्प(११)। १२. माहोमाहे विचार ते वितण्डावाद(१२)। १३. हेतु सरिखुं पणइ हेतु न हुइ ते हेत्वाभास(१३)। १४. वाक्य बीजुं अनइ अर्थथी बीजुं करी छलियइ ते छल (१४)। १५. जात(ति) कहेतां सामान्य विशेष बिहुं प्रकारनी छइ (१५)। १६. वादीनइ निग्रहना स्थानक (१६)। १७. ए १६ तत्त्व। १८. अथ वैशेषिक कहइ छइ। १९. वैशेषिकनइ त्रिहुं प्रमाणे करी अर्थसिद्धि मानइ। २०. एहनइ छ पदार्थ कहइ छइ। २१. द्रव्य कहेतां नव। २२. गुण कहेतां२४। २३. कर्म बिहुं प्रकारनउ। २४. पृथ्वीजलाग्निवायु ए च्यारि नित्य छइ अनित्य छइ, परमाणु भावइ नित्य स्थूलभावइ अनित्य। २५. पृथक्त्व कहेतां नील पीतादिभेद द्वयोः। २६. संयोगः द्वयो :। २७. विभाग कहेतां विहचवुं। २८. परत्व कहेतां न्यून। २९. अपरत्व कहेतां अधिकमति। ३०. इच्छा वांछा। ३१. यत्न कहेतां रक्षानुं(?)करवुं। ३२ संस्कार कहेतां वासना। ३३. गुरुत्व कहेतां भारो। ३४. द्रवत्व कहेतां ढीलुं थावुं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्नेहः[१] शब्दो[२] गुणा[३] एवं विंशतिश्चतुरन्विता ।
अथ कर्माणि[४] वक्षा(क्ष्या)मः प्रत्येकमभिधानतः ॥५१॥
[५]उत्क्षेपणावक्षेपणा[६]-कुञ्चन[७] प्रसारणम्[८] ।
[९]गमनानीति कर्माणि पञ्चोक्तानि[१०] तदागमे ॥५२॥
[११]सामान्यं भवति द्वेधा[१२] परं चैवाऽपरं तथा ।
प्र(पर)[१३]माणुषु वर्तन्ते विशेषा नित्यवृत्तयः ॥५३॥ सामान्यविशेषौ ॥
[१४]भवेदयुतसिद्धानामाधाराधेयवर्तिनाम् ।
सम्बन्धः समवायाख्य इहप्रत्ययहेतुक : ॥५४॥
[१५]विषयेन्द्रियबुद्धीनां वपुषः सुख-दुःखयोः।
अभावो(वा)दात्मसंस्थानं मुक्ति नै(नै)यायिकैर्मता ॥५५॥
[१६]चतुर्विंशवैशेषिकगुणान्तर्गुणा(न्तरगुणा)नव ।
बुद्ध्यादयस्तदुच्छेदो मुक्ति वैशेषिकी तु सा ॥५६॥
[१७]आधार-भस्म[१८]-को(कौ)[१९]पीन जटा[२०]-यज्ञोपवीतिनः[२१]।
[२२]मन्त्राचारादिभेदेन चतुर्धा स्युस्तपस्विनः ॥५७॥
[२३]शैवाः पाशुपताश्चैव महाव्रतधरास्तथा ।
तुर्याः कालमुखा मुख्या भेदा एते तपस्विनाम् ॥५८॥

इति शैवम् ।

---

१. स्नेह कहेतां चिक्कणता । २. शब्द आकाशोद्भव (२४)। ३. एवं गुण २४ हूआ । ४. हिवइ कर्मना नाम कहइ छइ । ५. उडवउं । ६. अधः जाइवुं । ७. ताणिवुं । ८. विस्तारवुं । ९. जावुं । १०. तेहना आगमनइ विषइ पांच बोल्यां । ११. सामान्य बिहुं प्रकारे । १२. सर्वत्र वर्तइ ते पर, अनइ एक विषइ वर्तइ ते अपर, ए बिहुंइं करी पदार्थ निर्धार करीयइ । १३. परमाणुं विषइ वर्तइ तेहनइ विशेष कहीयइ अनइ नित्यवर्ती कहीयइ । १४. अथ समवाय जूजूआ नीपजइ ते अयुतसिद्ध, ते एक एकनइ आधारि रहइ । तेहनउ जु संबंध तेहनइ समवाय कहीयइ : आहा छइ एह ज्ञाननउ कारण ते समवायः । १५. विषय इंद्रिय बुद्धि अनइ शरीरनुं सुख दुःख तेहनउ जे अभाव कहेता नाश, एहवा आत्मानउं थापिवुं नैयायिकनइ ते मुक्ति बोलीयइ । १६. पूर्वोक्त २४ गुण मांहि बुद्ध्यादिक जे नव तेहनउ जे उच्छेद नाश ते वैशेषिकनइ मुक्ति । १७. नैयायिकना तपस्वी कहइ छइ झोली भिक्षापात्र लीधइ हींडइ । १८. राख अडाडइ । १९. १ वस्त्र राखइ । २०. जटा राखई। २१. जनोऊ पहिरइ । २२. ए चिहुं प्रकारना मंत्रभेद करी च्यारि तपस्वी छइ । २३. एकशिवोपासकाः शैवाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ नास्तिकम्

पञ्चभूतात्मकं[१] वस्तु[२] प्रत्यक्षं च प्रमाणकम् ।
नास्तिकानां[३] मते नान्यदन्यत्रा(दत्रा)ऽमुत्र शुभाशुभम् ॥५९॥
प्रत्यक्षमविसंवादि[४] ज्ञानमिन्द्रियगोचरम् ।
लिङ्गतोऽनुम(मि)[५] तिर्धूमादिव वह्नेरवस्थितिः ॥६०॥
अनुमानं त्रिधा पूर्वं शेषं[६] सामान्यतो यथा ।
[७]दृष्टेः सस्यं [८]नदीपूराद् [९]वृ-ष्टिरस्तांद्रवेर्गतिः ॥६१॥
ख्यातं सामान्यतः[१०] साध्यं साधनं[११] चोपमा यथा ।
स्याद्[१२] गोवद् गवयः सानादिमत्त्वमुभयोरपि ॥६२॥
आगमश्चाऽऽप्तवचनं[१३] स[१४] च कस्याऽपि कोऽपि च ।
वाच्याप्रति[१५](ती)तौ तत्सिध्दयै प्रोक्ताऽर्थापत्तिरुत्तमैः ॥६३॥
ब[१६]हुपीनोऽह्नि नाऽश्नाति रात्रावित्यर्थतो यथा ।
[१७]पञ्चप्रमाणसामर्थ्ये वस्तुसिद्धिरभावतः[१८] ॥६४॥
स्थापितं वादिभिः स्वं स्वं मतं तत्त्वप्रमाणतः ।
[१९]तत्त्वं सत्परमार्थेन प्रमाणं तत्त्वसाधकम् ॥६५॥
[२०]सन्तु सर्वाणि शास्त्राणि सरहस्यानि दूरतः ।
एकमप्यक्षरं सम्यक् शिक्षितं नैव निष्फलम् ॥६६॥

---

१. प्रपंच पंचभूतात्मक मानइ । २. अनइ प्रत्यक्ष तेह्नि प्रमाण मानइ, बीजुं न मानइ ३. अनइ नास्तिक मति इहा नइ परलोकि शुभाशुभ नथी । ४. प्रत्यक्षइ जूठउ न थाइ ते ज्ञानेंद्रिय करी देखयइ ते प्रमाण मानइ । ५. नास्तिक अनुमानना ६ अंग कहइ चिह्नइ करी (१) मविवइ करी (२) स्थितइ करी (३); जिम धूम थकी वह्नि जाणीयइ तिम अनुमानना ए ३ अंग अहिन्हणि आतलूं आतलूं इत्यादि, चिरका[ल]लागइ ते स्थिति । ७. नास्तिक शेष थाकती सिद्धि जे ते सामान्याकारि कहइ ८. जिम निष्पत्तिइ धान्यनइ मानइ ९. नदी पूरइ वृष्टिनइ मानइ । १०. आथम्यइ रविनी गतिनइ मानइ । एतलइ नास्तिकनउ मत पूरउ थयुं । ११. सामान्य प्रकारि विख्यात हुइ ते साध्य । १२. ओपमाइ करी देखाडीयइ ते साधन १३. जिम गाइ सरिखउ गवय कहेतां अरण्य पशु, ते किम कांबलउ बिहुंनइ सरीखुं हुइ । १४. यथार्थ बोलणहारनउ वचन ते आगम कहीयइ । १५. ते आप्तभाषी कहइ एकनइ को एक छइ । १६. उत्तम पुरुष एहनइ अर्थापत्ति कहइ ते वाच्यनी प्रतीतिनइ विषइ तेहनी सिद्धिनइ काजइ । १७. जिम घणू जाडउ अनइ दीहइ न जिमइ तउ जाणीयइ ते रात्रइ जिमइ ज छइ, ए अर्थापत्ति प्रमाण । १८. पांचे प्रमाणे करी वस्तुसिद्धि कहइ । १९. को एक अभावथी कहइ ए छइ प्रमाण । २०. परमार्थइ करी तत्त्व ते सत्य, अनइ प्रमाण ते जे तत्त्वनइ साधइ । २१. सर्वशास्त्र हुउ किंलक्षणानि सपणिरहस्य, दूरि छइ पिणि एक अक्षर सीख्यउ हुइ रुडी परइ ते निष्फल न हुइ किंतु सफल ज हुइ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अज्ञातकर्तृक बे दृष्टान्त शतको

– सं. मुनि धर्मकीर्तिविजय

## भूमिका

दृष्टान्तशतक नामक ग्रंथनी आ एकमात्र प्रति पूज्य आचार्यवर्य श्रीशीलचन्द्रसूरिजीनी पासेथी उपलब्ध थई छे. अत्र बे दृष्टान्तशतक (२०० श्लोक) प्राप्त थयां छे.

प्रतमां संवत्‌नो निर्देश नथी तथापि प्रतना मध्य भागमां छिद्र तथा अक्षरोना मरोड उपरथी अनुमान करतां जणाय छे के १४मी शताब्दीना उत्तरार्धमां अथवा १५मी शताब्दीना पूर्वार्धमां आ प्रत लखायेल छे. तथैव आ ग्रंथमां कर्तानुं नाम पण मळतुं नथी. किन्तु ग्रंथनो अभ्यास करतां निःशंकपणे कही शकाय के ग्रंथकर्ता जैनमुनि ज छे. आ ग्रंथमां ५ पत्र छे.

**ग्रंथ विशेषता** –

१. ग्रंथाकारे ग्रंथारंभे नमस्काररूप मंगलाचरण कर्या विना ज शास्त्रारंभ कर्यो छे.

२. ग्रंथ पूर्ण थये छते ५मा पत्रना पूर्वार्धना अन्त्यभागमां तेमज उत्तरार्धमां अन्य विषयोनुं निरूपण छे.

३. प्रतिश्लोकमां मात्र दृष्टान्त ज नथी, परंतु उपमा साथे जीवनोपयोगी व्यवहारप्रचलित तेमज बोधदायक सूत्रोनो पण उपयोग कर्यो छे.

४. ग्रंथमां केवल जैनदर्शननां ज नही, किन्तु जैनेतरदर्शनमां थयेला विशिष्टपुरुषोननां दृष्टान्त पण टांक्यां छे.

५. ग्रंथमां थोडाक श्लोकोमां आदि चरण लखीने पूर्ण करी दीधां छे. ते अन्य सुभाषित ग्रंथो थकी उपलब्ध थई शके तेम धारणा छे.

| | | |
|---|---|---|
| जेम के १ | लक्ष्मी : पीडासहिष्णूनाम्० | १-२८ |
| २ | स्थानं सर्वस्य दातव्यमेक० | १-५६ |
| ३ | समाश्रयन्ति सर्वेऽपि० | १-७९ |
| ४ | अत्यासक्तस्य मूर्ध्दानमधि० | १-८- |
| ५ | सदोषपत्यसंयोगे मोदते० | १-८१ |
| ६ | लक्ष्मीभवानि तेजांसि० | १-९५ |
| ७ | परे पाण्डुरितं हन्तुम्० | १-९७ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६. श्लोक १-६७ना आद्य चरणनो प्रथम शब्द वांची शकातो न होवाथी [redacted] करी शकायो नथी.

७. २-१५मां श्लोकमां शालिभद्रशब्दनो बे वार प्रयोग कर्यो ते विमर्शनीय छे.

८. आ ग्रंथमां आवता विशिष्टशब्दप्रयोग—

१. धट १-२१, ५७-धड

२. पूनिका १-३९- रुनी पूणी

३. तर्कु -१-३९, २-२६ तकली (?)

४. मिसी १-४६- जटामांसी

५. झल्लरी १-९१ झालर

## दृष्टान्तशतक-१

तेजोऽत्युग्रमपि द्रव्या-भावे पुंसां प्रणश्यति ।
वह्निश्चण्डप्रतापोऽपि भस्म स्यादिन्धनक्षये ॥१॥
वृद्धानामथावज्ञा स्यादत्यासन्नापदामिह ।
पूर्णोऽथारात्कलपा(पे)तो राकेन्दुः केन वन्द्यते ॥२॥
सापवादः समृद्धोऽपि प्रायोऽवज्ञायते जने ।
पूर्णेन्दुः किं तथा वन्द्यो निकलङ्को यथा कृशः ॥३॥
सत्कृत्यस्तोकमस्तोकं प्रार्थ्यतेऽतिनवः प्रभुः ।
नवेन्दुः पोतभक्तानि तंतुनाभ्यर्च्य याच्यते ॥४॥
सर्वस्य मुष्यतेऽवश्यं परपीडाकृतोऽर्जितम् ।
मन्थान्म्रक्षणमुद्घृष्य गृह्यते दधिमन्थकात् ॥५॥
श्रीमतां दम्पतीधर्मे नेर्ष्या कापि परस्परम् ।
श्रीपतिर्यो पिकासक्तो मूर्षासक्ता हरिप्रिया ॥६॥
श्रीमतादृतमश्रेष्ठमपि श्रेष्ठं न दुःस्थितैः ।
शङ्खोर्व्यः श्रीपतेः पाणौ कपालं न कपालिनः ॥७॥
छद्मात्तं महतां वित्तं याति प्राणैः समन्वितम् ।
विदार्योदरमाकृष्टा वेदाः शङ्खस्य विष्णुना ॥८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केचित्पिबन्ति पानीयमपि नारीनिरूपितम् ।
दशामुखार्पितं पश्य प्रदीपः स्नेहमश्नुते ॥९॥
कस्याप्यशर(सदृ)शोऽपि स्याद्रामासौभाग्यमद्भुतम् ।
स्वाङ्गे निवेश्यते स्त्रीभिरातन्यतेऽन्यकञ्चुकः ॥१०॥
वीरस्यापि वणिक्सार्थे क्षुद्रात् भवति गंजना ।
शूरोऽपि सोमपार्श्वस्थो राहुणा गिलितोन किम् ॥११॥
अशस्त्रोऽपि वणिग्विप्रौ विद्रवेत् क्षत्रियः क्षमः ।
अबाहुरपि राहुः स्यात् चन्द्रार्कग्रसनप्रभुः ॥१२॥
वीरे शस्त्रं न वा मूर्त्तिः स्फूर्त्तिरेव समीक्ष्यते ।
पश्य पुष्पैरनङ्गेन निर्जिता जगतां त्रयी ॥१३॥
निष्फलं बलमङ्गानां प्रायेण क्रूरसङ्गरे ।
न नाशाय न युद्धाय बाहोः(?) पादाः करा रवेः ॥१४॥
गीयन्ते वीर्यवन्तस्ते ये रणे न पराङ्मुखाः ।
भुजा एव बलख्याताः पतद्वतो(द्वन्तो)ऽभिसम्मुखाः ॥१५॥
अद्भुताभ्युदयं दद्युर्वृत्तवन्तः पुरस्कृताः ।
बिन्दुरग्रे कृतोऽङ्कानां दत्ते दशगुणोन्नतिम् ॥१६॥
अन्तःशून्यानुगैः स्वामी जीवन्नपि मृतायते ।
सकलोऽथ प्रमाणाङ्को बिन्दुना पृष्ठगामिना ॥१७॥
उद्वेजितोऽपि सद्वृत्तः कालमुख्यं बिभर्त्ति न ।
वर्णोज्ज्वलधरो नित्यं भुज्यमानोऽपि पर्प्पटः ॥१८॥
सद्वृत्तो दण्ड्यतेऽथाऽऽरात् छिद्रीप्राप्तोऽपि मुच्यते ।
वारिहारिघटीं त्यक्त्वा ताड्यते तटझल्लरी ॥१९॥
कृतेऽपि दोषे सद्वृत्तः सारमादाय मुच्यते ।
रिक्तीकृत्य घटी वारिहारिणी स्थाप्यते पुनः ॥२०॥
छिन्ने मूर्धनि वीराणां धावत्यारभटं धटम् ।
रुद्रनेत्राग्निदग्धाङ्गोऽथ(था)नङ्गोऽद्यापि जृम्भते ॥२१॥
आसक्तिं कुरुते नीचेऽलं पाकमिलितः प्रभु : ।
रसमिश्रं लगत्याशु किं न स्वर्णमुदम्बरे ॥२२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दद्यान्मानं प्रभुर्भृत्ये व्यापारभारमर्प्पयन् ।
सूर्यः कुर्यात्कलान्यासं तमोनाशकृतेऽनले ॥२३॥
राजसंसदि न द्वेष आजन्मद्वेषिणामपि ।
एकवासो भवेत् राजमुद्रायामक्षर-श्रियोः ॥२४॥
परस्वाम्ये(म्य)पि तेजस्वी क्षुद्रात् रक्षत्युपद्रवात् ।
ब्रध्नो विध्वंसते ध्वान्तमन्यवारदिनेन किम् ॥२५॥
अलीकोक्त्या महान्तोऽपि विमुच्यन्ते प्रतिष्ठया ।
मिथ्योक्ते स शिरःस्पर्शादपूज्यो भुवि पद्मभूः ॥२६॥
महतां नामतोऽपि स्यात् क्षुद्रोपद्रवविद्रवः ।
किमगस्तिस्मृतेरेव नाहारार्त्तिः प्रणश्यति ॥२७॥
लक्ष्मीः पीडासहिष्णूनाम्० ॥२८॥
मानम्लानमपीच्छंति केचन स्वार्थपूरिताः ।
सहेतास्यरजःक्षेपं कुतपो रससंभृतः ॥२९॥
रिणमत्यर्थमप्यङ्गीकुर्यात्सर्वोऽपि दुर्बलः ।
क्षीणेन्दुरीहते पोतभक्तवृद्धया दशाञ्जनात् ॥३०॥
महतामप्यवज्ञा स्यात् वेषस्याडम्बरं विना ।
अब्धिमन्थेऽर्धचन्द्रोऽभूदीशेऽपि कृत्तिवाससि ॥३१॥
स्फूर्जयन्त्युद्भुतस्फूर्तिं विना मृत्युं न केचन ।
कोटिवेधी भवेत् सर्व-धातूनां पारदोऽ मृतः ॥३२॥
परप्राणपरित्राणं स्वप्राणैः केऽपि कुर्वते ।
लवणं क्षिप्यते वह्नौ परदोषोपशान्तये ॥३३॥
दुष्टसंचेष्टिते शिष्टे शिष्टः स्यादतिदुःखितः ।
सविषाणीक्ष्य भक्ष्याणि चकोरः किं न रोदिति ॥३४॥
स्त्रीणामपि सशास्त्राणां परचर्चाकृतौ रतिः ।
साक्षरा सर्ववस्तूनां मानमुन्मानयेत्तुला ॥३५॥
स्वार्थसंसिद्धये देया महत्ताऽतिलघोरपि ।
तृणाय पाणी युज्येते भक्तान्ते दन्तशुद्धये ॥३६॥
कुटिलस्य श्रियः प्रायो जायन्ते कष्टवेष्टिताः ।
विना वेधव्यथां कर्णैः स्वर्णांशोऽपि न लभ्यते ॥३७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उद्वेगकारिणः क्रूराः सह संवासिनामपि ।
एकास्यस्थाः समीहन्ते दशना रसनाग्रहम् ॥३८॥
मलिनान्निर्मले नाशो निर्मलात् मलिने गुणः ।
पूणिकागुणकृत्तर्कोस्तर्कुस्तस्याः क्षयंकरी ॥३९॥
अकर्म्मण्यपि मर्मज्ञे विफलो विक्रमश्रमः ।
लब्धच्छिद्राणि सिक्थानि चर्व्यन्ते न रदैरपि ॥४०॥
नीचोऽपि स्फूर्तिविख्यातः सेव्यः श्रेष्ठोऽपि नापरः।
तोषरोषक्षमाः ख्याताः पादा वन्द्यास्तु नो शिरः ॥४१॥
दुष्टपुत्राचरणतः पितुः स्यान्मानमर्दना ।
कस्य न क्षालयत्यंह्रीन् पङ्कविच्छुरितान् पयः ॥४२॥
समारचयति प्रायो पिता पुत्रविनाशितम् ।
जलेन क्षाल्यते सर्वं पङ्केन मलिनीकृतम् ॥४३॥
दुष्टः प्रविष्टमात्रोऽपि विपाटयति शिष्टहृत् ।
सौवीरान्तर्गते क्षीरे विशीर्येत सहस्रधा ॥४४॥
परि(र)वित्तव्ययं वीक्ष्य खिद्यन्ते नीचजातिकाः ।
न शुष्यति यवासः किं वारि व्ययति वारिदे ॥४५॥
महान्तो ये महान्तस्ते परैश्चेदपमानिताः ।
अहो मुखे मिखी[१](सी)दानादपि दृष्टिः प्रसीदति ॥४६॥
आस्तां सचेतने रागो दुःखं निश्चेतनेऽपि तत् ।
खण्डनक्षारनिक्षेपपदक्षोदैः कुसुंभवत् ॥४७॥
गुणी श्लाघ्यः सरागोऽपि पर्यन्ते यदि रागमुक् ।
श्वेताञ्चलं हि कौसुंभोत्तरीयवसनं श्रिये ॥४८॥
विना पुंसः स्त्रिया कर्म्म साध्यते साधु न क्वचित् ।
रसना दशनाभावे किं जल्पति किमत्ति च ॥४९॥
कार्याकार्याय कस्मैचिद्वक्रता सरलैरपि ।
जह्वुतां वस्तुनो वेत्ति किं चक्रुः कोणनां विना ॥५०॥
वरं सा निर्गुणावस्था यस्यां कोऽपि न मत्सरः।
गुणयोगेऽपि वैमुख्यं विश्वस्यापि प्रसूनवत् ॥५१॥

---

१. 'तपस्विनी जटामांसी जटिला लोमशा मिसी' इत्यमरः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हृदयान्तर्गुणान् धत्ते कोऽपि केसरपुष्पवत् ।
बहिः कृतगुणो भूयान् दृश्यतेऽथ प्रसूनवत् ॥५२॥
सन्ततौ लक्षसङ्ख्यायामेक एव विराजते ।
तद्विहीनस्थितैरङ्कैः शून्यता प्राप्यते ध्रुवम् ॥५३॥
लब्धे सहायमात्रेऽपि विक्रामन्ति महौजसः ।
विघ्नाली दलयत्याखुवाहनोऽप्याखुवाहनः ॥५४॥
गुणी लघुरपि स्तुत्यः सुमहानपि नागुणी ।
यथेक्षुपर्वणः श्लाघा लघोः स्यान्नालघोस्तथा ॥५५॥
स्थानं सर्वस्य दातव्यमेक ॥५६॥
धटमप्यङ्गवगूहन्ति रङ्गतस्त्यागिनः(?) स्त्रियः।
अमूर्ध्दापि न किं श्रीदः(द-) कञ्चुकः स्त्रीहृदा धृतः ॥५७॥
यावन्न स्वार्थसंसिद्धिस्तावदेव सुहृज्जनः ।
फलमारामिकः प्राप्य पश्य रम्भा निशुम्भति ॥५८॥
सुवृत्तः सुगुणः सोढा परार्थेऽनर्थमात्मनि ।
अन्तर्भूय पुयः स्फारघातादवति देहिनम् ॥५९॥
गुणिनोऽपि गुणाधानं कदापि स्यादवस्तुतः ।
विनाम्लतक्रनिक्षेपान्न दुग्धं दधि जायते ॥६०॥
दृश्यते महतां पङ्क्तौ जनैस्तुच्छोऽपि कार्यतः ।
किं न विन्यस्यते दक्षैर्नाणकान्तः कपर्दिका ॥६१॥
षण्ढेऽप्यर्थप्रदे पुंसि ध्रुवं रज्यन्ति योषितः।
नपुंसकमिदं श्रीदं दृष्ट्या कज्जलमादृतम् ॥६२॥
समं भर्त्रा कुलीनस्त्री सुखदुःखे विगाहते ।
वृद्धिं वित्प(प)दमप्येति नदेन सह पद्मिनी ॥६३॥
दुर्जनैर्दूषिता राजत्यधिकं काव्यपद्धतिः ।
लूकाझलकितं चूतं युज्यते पाकसम्पदा ॥६४॥
प्रथमं स एव साध्यो यद्बलतो रिपुरुपद्रवं कुरुते ।
दशवदननिधनमतिना रघुपतिना जलनिधिरबन्धि ॥६५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ईषल्लघुप्रवेशोऽपि स्नेहविच्छ(च्छि)त्ति पण्डितः ।
कृतक्षोभो नरीनर्ति खलो मन्थानदण्डवत् ॥६६॥
----- रसायनं यस्याः प्रयोगे पूर्वपूरुषाः ।
मृता जीवन्ति जीवन्तः पुनः स्युः कीर्तिपीवराः ॥६७॥
महानर्थाय महतामप्यसाधुसमागमः।
पश्य रावणसंसर्गात् बन्धमाप पयोनिधिः ॥६८॥
स्वान्ययोरुपकारी स्याद् ध्रुवं नीचः सदाश्रयः ।
वर्णाश्रया सखी स्वं च पत्रं च कुरुतेऽर्चितम् ॥६९॥
लक्ष्मीरसायनाभावे ये मृताः खलु ते मृताः ।
ये जीवन्ति पुनस्ते स्युर्जीवन्मृतसहोदराः ॥७०॥
सदलाभे कलौ काले श्रीः खेलति खलेषु यत् ।
ततो मन्ये निराधारा न नारी वर्तितुं क्षमा ॥७१॥
कठोरमपि सौख्याय प्रस्तावोच्चरितं वचः ।
याने वामखराराव: शिवायारतिकार्यपि ॥७२॥
सदा सौख्यकरं क्वापि माधुर्यमपि वर्ज्यते ।
अरतिं कुरुते वीणा रणरङ्गाङ्गणे न किम् ॥७३॥
विना भाग्यं वरं वस्तु वृद्धत्वे नोपलभ्यते ।
अब्धिमन्थोत्थरत्नेषु भिक्षैवासीत् पितामहे ॥७४॥
प्रायः श्रिया वृतं वस्तु लभते भुवि गौरवम् ।
श्रीवृक्षपर्णमालेव तोरणे मङ्गलप्रदा ॥७५॥
प्रायः पुसां धनोन्मानात् हृदयोष्मा प्रवर्तते ।
धूमरेखाप्रस्तरः स्यात् वह्नेरिन्धनमानतः ॥७६॥
साकारोऽपि सुवृत्तोऽपि निर्द्रव्यः क्वापि नार्घति ।
व्यक्ताक्षरः सुवृत्तोऽपि द्रम्मः कूटो विवर्ज्यते ॥७७॥
इन्दिरानादृते यान्ति विद्या एव कलङ्कताम् ।
अश्रीदृष्टो भवेद् द्रम्मः साक्षरो बाह्यटङ्कितः ॥७८॥
समाश्रयन्ति सर्वेऽपि० ॥७९॥
अत्यासक्तस्य मूर्ध्दानमधि० ॥८०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सदोषपत्यसंयोगे मोदते० ॥८१॥
सदा सर्वस्वदा शक्ता स्थानस्थेऽपि प्रिये प्रिया ।
किं न प्रावृषि वृक्षस्थं बकी भोजयते बकम् ॥८२॥
बाह्यानुरागिणां रागो नाम चापदि नश्यति ।
मुशलो(ले) खण्डनाच्छालिरामशालित्वमुज्झति ॥८३॥
अनुरक्तं स्त्रियामग्र्यं सदा देयं शिवार्थिनाम् ।
भानुरभ्युदयाकाङ्क्षी कुर्यादग्रेसरीं प्रभाम् ॥८४॥
पुरुषेण न मोक्तव्या निराशीकृत्य योषितः ।
त्यजेत्प्रकृतिमात्मापि क्षिप्त्वास्ये रत्नपञ्चकम् ॥८५॥
तेजस्विनोऽपि नारीभ्यः क्षितिः पुंस्त्वस्य जायते ।
कणिकाश्रितदीपस्य दीपिकेति किल श्रुतिः ॥८६॥
आत्मानं प्रकाशयेत् विद्वान् मा निष्पन्नप्रयोजनः ।
राहुर्गृहीतचन्द्रार्को दृश्यते दिवि नान्यदा ॥८७॥
भ्रष्टप्रतिष्ठ(ष्ठ) किल साधुलोकः प्राप्तप्रतिष्ठस्तु कलौ खलौघः ।
ततः खलौघैः खलु खेलति श्रीः कालोचितं केऽपि विचारयन्ति ॥८८॥
गुरुः सुवृत्तः पूर्णोऽपि स्याददानादधो घटः ।
लघुः काणोऽपि कुब्जोऽपि दानादुपरि कर्करी ॥८९॥
महोत्सवोऽथ पुण्यानां विपदे न मुदे भवेत् ।
सर्वानन्ददीपाल्यां सूर्प्पकं ताडयेज्जनः ॥९०॥
मार्यमाणः सुवृत्तोऽपि परमर्माणि भाषते ।
वारिहारिघटीदोष ताडिताऽऽख्याति झल्लरी ॥९१॥
आपद्गतोऽपि संदृष्टः कुलीनः परसौख्यदः ।
मृन्मङ्गलाय मार्गे स्यात् खरारूढापि सम्मुखी ॥९२॥
अकार्यकार्यपि त्यागी महामहिमभूर्भवेत् ।
स्तुत्यो भागेऽपि कन्याया वर्षन् हस्तेन भानुमान् ॥९३॥
निर्लक्षणः क्षणाल्लक्ष्मीमाश्रयस्यापि लुम्पति ।
पतन्कपोतः कुरुते शाखाशेषं हि शाखिनम् ॥९४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्ष्मीभवानि तेजांसि० ॥९५॥
विशीर्यन्ते कदर्यस्य श्रियः पातालपक्त्रिमाः ।
अगाधमन्धकूपस्य पश्य शैवलितं पयः ॥९६॥
परे पाण्डुरितं हन्तुम्० ॥९७॥
मूर्खस्य मुखमीक्षन्ते क्वापि कार्ये विचक्षणाः ।
विना निकषपाषाणं को वेत्ति स्वर्णवर्णिकाम् ॥९८॥
विभवे विभवभ्रंशे सैव मुद्रा महात्मनाम् ।
अब्धौ सुरात्तसारेऽपि न मर्यादाविपर्ययः ॥९९॥
सेवितोऽपि चिरं स्वामी विना भाग्यं न तुष्यति ।
भानोराजन्मभक्तोऽपि पश्य निश्चरणोऽरुणः ॥१००॥

**दृष्टान्तशतं समाप्तम् ॥**

## *दृष्टान्तशतक-२*

देवा भाग्यवतां पक्षे प्रायो धार्मिकलोकतः ।
चक्रे कोणिकसान्निध्यं चेटकस्य न कौशिकः ॥११॥
रक्षकेष्वपि देवेषु क्रूरकर्म्म विजृम्भते ।
श्रुत्योः कीलव्यथाः वीरः सेहे किं न सुरार्चित : ॥२॥
स्पर्द्धया धर्मकृत्यानि महान्तोऽपि प्रकुर्वते ।
दृष्ट्वा दशार्णभद्रर्ध्दिमिन्द्रोऽप्यागात् तथा जिनम् ॥३॥
व्यापत्तापे कृपास्नेहौ महतामपि नश्यतः ।
कान्तां तथा हि कान्तारे राज्यभ्रंशे नलोऽत्यजत् ॥४॥
महतामप्यहो राज्यतृष्णा मुष्णाति सन्मतिम् ।
स्वभ्रातुर्भरतोऽप्युच्चैश्चक्रं चिक्षेप सन्मुखम् ॥५॥
वैराग्यं जनयत्याशु बन्धुजा विक्रिया सताम् ।
बुद्धो बाहुबलिर्बुद्ध्वा भ्रातरं भ्रान्तसन्मतिम् ॥६॥
दृष्ट्वा बलवती पृष्टिमल्पोऽप्यारभते महत् ।
ययौ किं चमरो नेन्द्रसभां श्रीवीरनिश्रया ॥७॥
कोपाटोपात्कृतेऽप्यार्थे विमृशन्ति महाधियः ।
संजहार पविं शक्रो सुरं ज्ञात्वा जिनाद् दृढम् ॥८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अदत्तेऽपि फलं भावाद्विफलं भाववर्जितम् ।
नवश्रेष्ठि(ष्ठी) ददौ दानं जीर्णस्तु फलभागभूत् ॥९॥
क्षान्त्या तुष्यन्ति तत्त्वज्ञास्तपसापि न तां विना ।
हित्वा सेर्ष्यान् मुनीन् देव्या नेमे क्षान्तिधनो मुनिः ॥१०॥
गिरां दूरेऽस्तु चित्तस्याप्यत्याज्यो निश्चयः सताम् ।
व्युत्सर्गं नामुचत् दीप्रे दीपे चन्द्रावतंसकः ॥११॥
दृढशीलसमृध्दीनां स्वयं तुष्यति देवता ।
पश्य जम्बूगुणैर्देव्याः प्रभावः प्रा(प्र)भवो हृतः ॥१२॥
त्यजन्त्यनार्यकर्म्म द्राक् कुलीनाः प्रेक्ष्य बोधिदम् ।
बुद्धो जम्बूप्रभोर्वाचा प्रभवः किं न चौरराट् ॥१३॥
विना यत्नं महापुण्यप्राप्तिः कस्याप्यहो भवेत् ।
पायसं संगमः क्वाप संगमः क्व मुनेरभूत् ॥१४॥
सत्कृतं सुकृतं कुर्यादल्पस्यापि महत्फलम् ।
किं नाप्तं(प्तः) शालिभद्रेण शालिभद्रेण वैभवम्(वः) ॥१५॥
दानं देवैरपि श्लाघ्यं वेलादत्तं विशेषत : ।
स्मृत्वा दानं ददौ राज्यं मूलदेवाय देवता ॥१६॥
न त्यजन्ति दुरात्मानः स्वभावं भाषिता अपि ।
कालसूकरिकः कूपे क्षिप्तोऽप्यौज्झत्कथं वधम् ॥१७॥
स्वयं(स्वं) कष्टे पातयित्वापि प्राज्ञः पापान्निवर्तते ।
कुठारेणांह्रिमाजघ्ने किं नोज्झन् सुलसो वधम् ॥१८॥
स्फुरन्ति मोहराजस्य मुनीन्द्रेष्वपि केलयः ।
मुञ्चत्यश्रूणि दिष्ट्यान्ते सूनोः शय्यंभवोऽपि यत् ॥१९॥
दूषयन्ति निजां सन्धां कलयापि न सात्त्विका : ।
मोदकान् कृष्णलब्ध्याऽऽप्तान् पर्यस्थापयदाच्युतिः ॥२०॥
सर्वस्यापि समो धर्मो नान्वयं सन्तमीक्ष्यते ।
तत्कुलं नंदिषेणस्य पुण्योत्कर्षश्च तादृश : ॥२१॥
कुलीना व्रतभङ्गेऽपि हितमेवाचरन्त्यहो ।
दश बोधितवान्नित्यं नंदिषेणोऽवकीर्ण्यपि ॥२२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुचिरं परिपाल्यापि विफलं व्रतमुज्झितम् ।
पश्याधः कण्डरीकोऽगात्ततो दीर्घतपा अपि ॥२३॥
महद्भिस्तुलनामिच्छन्ननात्मज्ञो विनश्यति ।
स्पर्ध्दया स्थूलभद्रस्य पश्य यन्मुनिरन्वभूत् ॥२४॥
वृथा वाग्विहितो यत्नः कर्म्म भुक्तं विलीयते ।
भेजे तथात्तदीक्षोऽपि भामिनीं मुनिरार्द्रकः ॥२५॥
बलिष्ठैरपि दुर्लङ्घ्या तुच्छापि स्नेहशृङ्खला ।
तस्थौ किं नार्द्रको नध्दः श(शि)शुना तर्कुतन्तुभिः ॥२६॥
निःसङ्गैरपि नोपेक्ष्या शासनस्य तिरस्क्रिया ।
वज्रस्वाम्यपि पुष्पौघमानिनायाऽन्यथा कथम् ॥२७॥
यन्न बुद्ध्यापि सम्भाव्यं धर्मात्तदपि जायते ।
प्रोध्दृतं पश्य चालिन्या कूपादम्भः सुभद्रया ॥२८॥
किं पुत्रैरर्थितैरेकैः श्रिये साध्व्यः सुता अपि ।
सतीमतल्लिकाः पुत्र्यः पुपुवुश्चेटकान्वयम् ॥२९॥
अयत्नात्तत् कदापि स्यात् यत्कष्टैरपि नो भवेत् ।
गौतमानुगमादेव दिन्नाद्यैः प्रापि केवलम् ॥३०॥
दर्शनादपि पूज्यानां जायते पुण्यसन्ततिः ।
हालिको गौतमालोकादभवत् बोधिबीजभाक् ॥३१॥
यत्र कुत्राप्यसम्भूतं दैवात्तदपि जायते ।
क्षिप्ता स्रक्कृष्णया जिष्णौ वव्रे पञ्चाऽपि पाण्डवान् ॥३२॥
प्रायः पापैर्न लिप्यन्ते सदाचाराः कृतैरपि ।
तद्भवेऽपि स्म सिध्यन्ति बन्धुघातेऽपि पाण्डवाः ॥३३॥
न लङ्घन्ते सदाचाराः स्वाम्यर्थेऽपि स्वकं वचः ।
कृत्वा कौरवसाद्राज्यं प्रावात्सुः पाण्डवाः स्युः (वने) ॥३४॥
अवाक्प्रतिष्ठाशीलानां ध्रुवं नाशो धनायुषोः ।
काले राज्यममुंचन्तो विलीनाः किं न कौरवाः ॥३५॥
को बलस्यावकाशोऽस्ति दैवे प्रत्यर्थितां गते ।
तटस्थस्यैव दैत्यारेर्दग्धा द्वारवती पुरा ॥३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पितॄन् बाल्येऽनुवर्तन्ते शि(श)लाकापुरुषा अपि ।
जरासिंधुभये नष्टौ हरिनीलाम्बरावपि ॥३७॥
दुस्त्यजो विषयासङ्गस्तपस्यपि चिरं स्थितैः ।
दृष्ट्वा राजीमतीरूपं विचक्रे रथनेम्यपि ॥३८॥
कुरुध्वं किमकृत्यानि प्रभुत्वश्रीबलोध्दताः ।
हृत्वा सीतां दशास्योऽपि ययौ नाशंव न किं श्रुतम् ॥३९॥
भेकी यत्स्याच्छिरस्ता(तो)ऽहेस्तन्मान्त्रिकविजृम्भितम् ।
यन्मुनेर्बोधकृत्कोशा स्थूलभद्रप्रभैव सा ॥४०॥
यद्यस्मादत्यसम्भाव्यं कदापि स्यात्ततोऽपि तत् ।
पश्य पण्याङ्गना कोशा मुनिं मार्गे न्यवेशयत् ॥४१॥
घोरमप्यघमुग्रेण तपसा श्वेव नश्यति ।
प्राप्तं चिलातीपुत्रेण स्त्रीवधेऽपि त्रिविष्टपम् ॥४२॥
अपि बुध्दिमतां धुर्यैर्धर्मदम्भो न भिद्यते ।
नीतोऽभयकुमारोऽपि श्रावकीभूय वेश्यया ॥४३॥
भवेत् दुश्चारिणां यत्नः सुमहानपि निष्फलः ।
प्रद्योतोऽकारयद्वप्रं न तु प्राप मृगावतीम् ॥४४॥
पश्चात्तापे सति प्रायो हिते प्रज्ञा प्रवर्तते ।
श्रीवीरप्रतिमां कृत्वाऽपूजयत्स्वर्णकृत्सुरः ॥४५॥
विवेकिनां परद्रव्यं तृणादपि न किंचन ।
दृष्ट्वाऽऽगात् कुण्डलं भ्रष्टं नागदत्तोऽन्यवर्त्मना ॥४६॥
जीवा दुःखेन मोच्यन्ते विषयाद् विबुधैरपि ।
गन्धर्वनागदत्तस्य[१] कियद् बोधे सुरोऽक्लिशत् ॥४७॥
सुराः कुर्वन्ति सान्निध्यं सङ्कटे शीलशालिनाम् ।
जाता सुदर्शनस्याहो शूलिकापि सुखासनम् ॥४८॥
इष्टप्राप्तौ महेच्छानां चेदिच्छैव विलम्बते ।
अवन्तीसुकुमालस्य को लग्नः स्वर्गतौ क्षणः ॥४९॥

---

१. प्रथमभवे वसंतपुरे समृद्धदत्तवसुदत्ताख्यौ मित्रौ । द्वि० भवे धरावासे नगरे सागरदत्त श्रेष्ठी, पत्नी धनदत्ता, प्रथमजीवस्तयोः पुत्र : नागदत्तः । पश्चात् गन्धर्वनागदत्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वासामपि शक्तीनां तपःशक्तिर्विशिष्यते ।
लङ्केन्द्रस्यास्खलद् यानमूर्ध्वं वालिमुनेर्गतम् ॥५०॥
यस्तारुण्येऽपि दुःसाध्यः सोऽर्थो बाल्येऽतिचित्रकृत् ।
अन्त्यस्य देवकीसूनोः सत्त्वे को नाधुनच्छिरः ॥५१॥
अप्रकम्प्या स्थितिर्ज्ञाततत्त्वामां(नां) त्रिदशैरपि ।
यक्ष एव विलक्षोऽभूत् न विलक्षस्त्रिविक्रमः ॥५२॥
गुणिनां गौरवं कार्यं वयोपेक्षा न युज्यते ।
वज्रं किं वाचनाचार्यं न बाल्येऽप्यकरोद् गुरुः ॥५३॥
गौरवाय गुणा एव वयस्तत्र न कारणम् ।
वज्रः शावोऽपि पूज्योऽभूत् नैव वृद्धोऽपि तत्पिता ॥५४॥
श्रेयःसर्वस्वहा क्रोधः कृतः प्रान्ते विशेषतः ।
निरार्यापि(निर्याम्यापि) परान् दुष्टं जन्माप स्कन्दकः स्वयम् ॥५५॥
पूर्वं किं न कृतं पुण्यं मा रोदीर्दुर्गतौ गतः ।
दुःखान्मोक्षः शुचा चेत् स्यात् ही शुशोच शशी न किम् ॥५६॥
दुष्कृतानुपदं श्रेयः कृतं सद्योऽघमर्षणम् ।
जगामानशनात् स्वर्गं वीरं दृष्ट्वापि कौशिकः ॥५७॥
स्वाङ्गकष्टं विषह्यापि विधत्तेऽथ हितं महान् ।
अहिदंशव्यथां सेहे वीरस्तद्बोधनोद्यतः ॥५८॥
वल्लभाविप्रलम्भेण धीरोऽपि विधुरो भवेत् ।
श्रीरामः किं न बभ्राम शंसन् सीतां लता अपि ॥५९॥
शस्त्रघातव्यथाभ्योऽपि मानस्यो दुस्सहा रुजः ।
रामस्तथा न चक्लाम युध्दैर्यद्वत् हृतप्रियः ॥६०॥
शनैः स्यात् सम्पदां वृध्दिः क्षणादपि पुनः क्षयः ।
सगरस्याङ्गजातानां का वेला विलयेऽलगत् ॥६१॥
सर्वपापाण्यधः कुर्युः शुध्दधीः क्षणमप्यहो ।
निन्दित्वा प्रान्तकाले स्वं गोशालोऽपि दिवं ययौ ॥६२॥
यद्विधेरपि चित्राय रचयन्ति तदङ्गनाः ।
प्रत्युत श्वसुरं चौरं चक्रे नूप(पु)रपण्डिता ॥६३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिष्ठन्तु प्रचुरा दूरे श्रोतव्याः कापि वाक् सताम् ।
गाथां श्रुत्वार्हतीमेकां रौहिणेयोऽपि सुरव्यभूत् ॥६४॥
प्राणेभ्योऽपि प्रियं धर्मं गणयन्ति यतीश्वराः ।
नाऽऽचरव्यौ कालिकाचार्यो दत्तभीत्याऽनृता गिरः ॥६५॥
अहो मन्ये विडम्ब्येत महर्षिरपि मायिभिः ।
कूटाच्चिटकयोः कीदृग् जमदग्निरजायत ॥६६॥
शक्यते महिमा केन परिच्छेत्तुं महात्मनाम् ।
वृध्दिं विष्णुकुमारस्य वीक्ष्य शक्रोऽपि विस्मितः ॥६७॥
वाग्देहे सुदमे स्वान्तं दुर्दमं महतामपि ।
गतः प्रसन्नचन्द्रोऽपि दुर्ध्यानं दुर्मुखोदितैः ॥६८॥
कारणेऽपि कृतः क्रोधो दीर्घदुःखकृते भवेत् ।
निदानात्पारणाभङ्गेऽग्निशर्माऽभूच्चिरं भवी ॥५९॥
अपराध्यपि शुध्दात्मा स्वं निन्दन् स्यादनिन्दितः ।
असिध्यद्गुणसेनात्मा मुनेर्हेतुरपि क्रुधः ॥७०॥
दाक्षिण्यादपि नालीकं ब्रूयादण्वपि बुध्दिमान् ।
कूटसाक्षिकमात्रेण न्यपतन्नरकं वसुः ॥७१॥
कदर्याणां धनं प्रायो नान्येषामपि शर्मणे ।
गतो नन्दनिधीन् दृष्ट्वा कल्की कल्कपरः क्षयम् ॥७२॥
गुणैर्नार्यो(र्योऽ)प्यसामान्यैः पूज्याः स्युर्महतामपि ।
श्रीवीराभिग्रहे पूर्णे स्तुतेन्द्रेणापि चन्दना ॥७३॥
ऋध्दावपि विचारेण प्रवर्तन्ते विचक्षणाः ।
राज्ञीत्वेऽपि गतोत्सेकं न चित्रकरदारिका ॥७४॥
सम्प्राप्तामपि पापात्मा भोक्तुं न लभते श्रियम् ।
स्वर्गमत्याजयच्छक्रः सङ्गमं वीरवैरिणम् ॥७५॥
हिता(त)बुद्धया कृता पीडाऽप्यहो पुण्यप्रदा भवेत् ।
वैद्यौ स्वर्गं गतौ कृष्ट्वा वीरस्य श्रुतिकीलकौ ॥७६॥
यादृक् तादृगवस्थोऽपि गुरुर्गौरवमर्हति ।
शयालुं शेलकाचार्यं पन्थकोऽक्षामयन्न किम् ॥७७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परां कोटिगतं सत्त्वं निपुणानां मुदे भवेत् ।
स्तुतो देवैर्हरिश्चन्द्रश्चीराक्रर्षी मृताङ्गजात् ॥७८॥
प्राणान् दत्त्वापि रक्षन्ति सात्त्विकाः शरणागतम् ।
वज्रायुधस्तुलां श्रित्वा श्येनात् पारापतं पपौ ॥७९॥
सुबह्वपि तपस्तुच्छफलमज्ञानतः कृतम् ।
अन्येषां मोक्षदात्कष्टादीशाने तामलिर्ययौ ॥८०॥
निष्फलङ्कः कृतो धर्मः स्यादल्पोऽपि महर्ध्दये ।
इन्द्रोऽभूत् कार्तिकश्रेष्ठी सम्यक् श्रध्दानशुध्दितः ॥८१॥
दुष्कराण्यपि कुर्वन्ति कामिनः कान्तयाऽर्थिताः ।
एकस्तम्भं व्यधात्सौधं श्रेणिकश्चेल्लणाकृते ॥८२॥
नर्ते प्राप्यं महत्पुण्यं लोभः स्यात्सहसा महान् ।
यज्जिनो बोध्दुमेत्यश्वं जिनार्चाफलमेव तत् ॥८३॥
अप्राज्ञेनापि मोक्तव्यः श्रुताभ्यासः कदापि न ।
पश्य माषतुषोऽऽप्यासीदनिर्वेदाद्गुणोत्तरः ॥८४॥
पशोरपि पदस्पर्शैर्भूर्विशुध्दस्य पूयते ।
जातमश्वावबोधाख्यं जातमश्वान्न किं वद ॥८५॥
सामान्यस्यापि सत्कर्म्म श्लाघ्यमेवोत्तमैरपि ।
प्रशशंस न किं वीरः कामदेवं दृढव्रतम् ॥८६॥
स्मरेन्मन्त्रं न कः पञ्चपरमेष्ठिनमादरात् ।
शकुन्तिकापि यं श्रुत्वा पश्य जाता सुदर्शना ॥८७॥
ऋतमप्यप्रियं प्रोक्तं शुद्धानामपि दोषकृत् ।
श्रीवीरः शतकस्यापि प्रायश्चित्तमदापयत् ॥८८॥
आर्जवं नाम मर्त्यानां ध्रुवं सर्वोत्तमो गुणः ।
यत्करीन्द्राधिरूढापि मरुदेव्याप केवलम् ॥८९॥
आत्मशुद्धौ गुणा हेतुर्न दीक्षा नैव काननम् ।
प्रापाऽऽदर्शगृहस्थोऽपि केवलं भरतेश्वरः ॥९०॥
साधूनां दर्शनेनापि स्यात् सरागोऽपि निर्मलः ।
नाभूदिलातीपुत्रः किं वंशाग्रस्थोऽपि केवली ॥९१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतातिशायि केषांचित् सच्चरित्रं कलावपि ।
वेश्यावासे रसानश्नन् स्थूलभद्रो जयेत्स्मरम् ॥९२॥
महद्भिश्चरितं वर्त्म गौरव्यं स्यात् श्रुतादपि ।
कालिकाद् वार्षिकं पर्व चतुर्थ्यां कस्य नो मतम् ॥९३॥
असाध्यं साधयन्त्यर्थमुपायेन विचक्षणाः ।
बोधितोऽनार्यलोकोऽपि धर्मं संप्रतिभूभुजा ॥९४॥
पुंसां कालौचितीज्ञानं प्रकर्षाय विशेषतः ।
विजिग्ये रासकान् दत्त्वा विवादी वृद्धवादिना ॥९५॥
यथातथापि स्वावर्णं व्यस्यन्त्येव विपश्चितः ।
मृत्युदम्भादृतं वेश्या पादलिप्तेन भाणिता ॥९६॥
बहुश्रुतत्वं केषांचित्तत्त्वविघ्नाय प्रत्युतः(त) ।
बोधितोऽतिचिरात् क्लेशैरामराड् बप्पभट्टिना ॥९७॥
सद्बुद्ध्या पश्यतां बोधः स्यादल्पादपि हेतुतः ।
धनपालेऽभवद्बोधो दध्नि निध्याय देहिनः ॥९८॥
सन्तस्तत्प्रेक्ष्य कुर्वन्ति शुभं सर्वातिशायि यत् ।
ऋते कुमारपालात् को रुदत्याः स्वं पुराऽत्यजत् ॥९९॥
प्रमाणमुदयः पुंसां कालाकालधिया कृतम् ।
एकच्छत्रं कृतं जैनं श्रीहेमेन कलावपि ॥१००॥

**दृष्टान्तशतं समाप्तम् ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अज्ञातकर्तृक समवसरणस्तोत्र

- सं. आ. अरविंदसूरि

पचीसेक वर्ष पहेलां मालगाम (राजस्थान)ना उपाश्रयमां अस्त-व्यस्त पडेलां पानाओमांथी कोई विद्वाने संग्रह करेल स्तोत्रोनां दशेक पानां मळयां. आगळना पत्रो मळ्या नथी अने मळेला पत्रोमां स्तोत्रादिना कर्तानो, संग्रहकर्तानो के लेखनसंवत् व. कशो उल्लेख नथी.

सोळमा के सत्तरमा सैकामां लखायेली प्रतना अक्षरो झीणा पण मरोडदार सुंदर छे. क्यांक क्यांक मार्जिनमां अघरा शब्दोना अर्थो के जाप आदिनी विधि बतावी छे.

दरेक पत्रनी बन्ने बाजु १९-१९ पंक्ति अने दरेक पंक्तिमां ६० जेटला अक्षरो धरावता आ पत्रोमां २२ जेटली कृतिओ छे. एमां एक मोटी शांति (भो भो भव्याः अने एक गौतमस्वामिअष्टक (श्रीइन्द्रभूतिं) सिवायनी कृतिओ अजाणी अने प्रायः अप्रसिध्ध छे. छेल्ली त्रणने बाद करतां बाकीनी बधी संस्कृत कृति छे.

आ संग्रहनी प्रथम कृति समवसरणस्तव (संस्कृत) अहीं प्रस्तुत छे.

## *समवसरण-स्तोत्रम्*

सत्केवलज्ञानमहाप्रभाभिः प्रकाशिताशेषजगत्स्वरूपम् ।
स्तवीमि तं वीरजिनं सुरौघा यद्देशनासद्मनि चक्रुरेवम् ॥१॥

आयोजनं भूमितलस्य सन्मार्जनं व्यधुः वायुकुमारदेवाः ।
तस्यैव गन्धोदकवर्षणेन, रजःप्रशान्तिं विदधुश्च मेघाः ॥२॥

सरत्नमाणिक्यशिलाभिरिद्धं, विधाय तत्राऽचलपीठबन्धम् ।
किरन्ति पुष्पाणि विचित्रवर्णान्यस्योपरि व्यन्तरराजवर्याः ॥३॥

वैमानिका ज्यौतिषिकाश्च तत्र सद्भक्तिभाजो भुवनाधिपाश्च ।
वप्रत्रयं रत्नसुवर्णरूप्यमयं विचक्रुर्द्युतिभासिताऽऽशम् ॥४॥

आभ्यन्तरे रत्नमये विशाले, साले विरेजुः कपिशीर्षकाणि ।
सुरैः प्रक्लृप्तानि मणीमयानि, सद्दर्पणाः किं ननु धर्मलक्ष्म्याः ॥५॥

विमध्यमे रत्नमयानि तानि हैमानि चामूनि बहिस्थवप्रे ।
गव्यूतमेकं धनुषां शतानि, षडेव तेषामियमन्तरुर्वी ॥६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाहुल्यमेषां धनुषां त्रयस्त्रिंशदेक[श्च]हस्तोऽङ्गुलकानि चाष्टौ ।
लसच्चतुर्द्वारविराजितानां तथोच्चता पंचधनुःशतानि ॥७॥

भूमेः सहस्राणि दशैव गत्वा, सोपानकानां प्रथमोऽत्र वप्रः ।
धनूंषि पंचाशदतः समा भूः, सोपानकानां हि ततोऽयुतार्द्धे ॥८॥

द्वितीयवप्रोऽत्र तदन्तरेऽभूत्, विधिस्तु पूर्वोदित एव सर्वः।
ततस्तृतीयोऽपि बभूव वप्रस्तदंतरं वा मणिपीठबंधात् ॥९॥

इत्थं सहस्रा दश पंच पंच, क्रमेण शालत्रयसंगतानाम् ।
सोपानकानां प्रमितिस्त्वमीषां, करैकमानोन्नति-विस्तराभ्याम् ॥१०॥

प्रमाणमेतत् सकलं विबोध्यं निजैर्निजैरेव करैर्जिनानाम् ।
देहादिवैचित्र्यत एव तेषां, न चान्यथा संगतिमंगतीदम् ॥११॥

भूमितलादूर्ध्वमथार्द्धयुक्तगव्यूतयुग्मं परितोऽधिरुह्य ।
तृतीयवप्रे बहुमध्यदेशे, ज्योतिर्जटालं मणिपीठमासीत् ॥१२॥

विष्कम्भतश्चापशतद्वयं तदौन्नत्यतः श्रीजिनदेहमानम् ।
विरेजुरस्योपरि चारुसिंहासनानि चत्वारि मणीमयानि ॥१३॥

मणीमयच्छंदकसंगतानि चाऽशोकवृक्षं परितः स्थितानि ।
छत्रत्रयेणोर्ध्वगतेन चन्द्रप्रभासमानद्युतिना युतानि ॥१४॥

सुपर्वसञ्चारितपङ्कजेषु, न्यासं दधानः क्रमपङ्कजानाम् ।
सिंहासनं स्वामिवरोऽथ भेजे, पूर्वामुखं पूर्वगिरिं यथांशुः ॥१५॥

ततो व्यधीयन्त च शेषदिक्षु सद्व्यन्तरैस्तत् प्रतिरूपकाणि ।
चतुर्मुखस्तैर्भगवान् विरेजे, चतुर्विधं धर्ममिवोपदेष्टुम् ॥१६॥

तत् पार्श्वयोर्यक्षवरा बभूवुः करे धरन्तो वरचामराणि ।
अभ्रंलिहाः स्वामिपुरो विरेजुर्महाध्वजा रत्नमयोच्चदण्डाः ॥१७॥

पुरो जिनेन्द्रस्य च धर्मचक्रचतुष्टयी चारुरुचिर्बभासे ।
प्रख्यापयन्ती भविनां मनस्सु सद्धर्मचक्रित्वमपूर्वमस्य ॥१८॥

आग्नेयका मुख्य विदिक्षु तिस्रः, प्रत्येकमस्थुश्च सभाः क्रमेण ।
सुसाधवः कल्पसुरांगनाश्च, साध्व्यश्च धर्मश्रवणैक-निष्णाः ॥१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्योतिःपतीनां भुवनाधिपानां, सद्व्यन्तराणां च विलासवत्यः ।
त्रयोऽपि ते देववरास्ततोऽपि, वैमानिका मर्त्यवराः स्त्रियश्च ॥२०॥

तिर्यग्वराः सिंहमृगाहिबभ्रु-मुख्याः प्रशान्त द्वितीयेऽथ वप्रे ।
संत्यक्तवैरा भगवद्वचांसि, पपुः कणेहत्यकृतोर्ध्ववक्त्राः ॥२१॥

यानानि वप्रे तृतीये बभूवु र्नियंत्रणा नो विकथाभयं न ।
न मत्सरस्तत्र परस्परेणाऽभवज्जिनेन्द्रस्य कट प्रभावः ॥२२॥

आसन् प्रतिद्वारमिहावलम्बि ध्वजानि चञ्चन्मणितोरणानि ।
पंचालिका मङ्गलकानि चाष्टौ, सत्पूर्णकुम्भा वरधूपघट्य : ॥२३॥

माणिक्यवप्रे प्रतिहारूपः सौधर्मनाथो वनजाधिपश्च ।
द्वारेऽवतस्थे भुवनाधिपोऽथ ज्योतिःपतिस्ते तु विचित्रवर्णाः ॥२४॥

सौवर्णवप्रे विजया जया च, जिताभिधानाऽप्यपराजिता च ।
द्वारस्थिताः शस्त्रकरास्तथैताः दौवारिकत्वं विदधुर्जिनस्य ॥२५॥

वप्रे बहिस्तुंबरनामदेवः खट्वांगनामा पुरुषोऽस्ति माली ।
एते प्रतिद्वारमुदात्तदंडाः क्रमाज्जटामंडितमौलयोऽस्थुः ॥२६॥

मणीमयच्छन्दक एव आसीदीशानकोणे जिनविश्रमाय ।
माणिक्यवप्रस्य बहिः सुरौघैर्विनिर्मितः किं नु निजैर्महोभिः ॥२७॥

सद्देशनासद्मनिवृत्तरूपे, बहिस्थवप्रस्य किल प्रदेशे ।
द्वे द्वे भवेतां वरपुष्करिण्यौ, कोणेषु चैका चतुरस्रके स्यात् ॥२८॥

गायन्ति नृत्यन्ति च देवसंघा जिनेन्द्रसंदर्शनतोऽतिहृष्टाः ।
प्रमोदमन्तःस्थमनासवन्तो, धर्तुं विमुञ्चन्ति च सिंहनादान् ॥२९॥

इन्द्रादिकः कोपि महर्द्धिकोऽथ समेति देवो यदि भक्तियुक्तः ।
सर्वं तदैकः कुरुते स यद्वा भक्तेः प्रभुत्वस्य च किं न साध्यम् ॥३०॥

अजातपूर्वः किल यत्र यत्र, महर्द्धिकः कोपि समेति देवः ।
इदं पुनस्तत्र भवेदवश्यं, सुप्रातिहार्याणि निरंतरं स्युः ॥३१॥

जगच्चमत्कारकरैश्चतुस्त्रिंशताभिरामातिशयैः समग्रैः ।
निर्वाणमार्गं प्रथयन् जनानां चिरं जगत्यां जयतात् जिनेन्द्रः ॥३२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स सर्वभाषानुगया जिनेंद्रः सद्भाषया योजनविस्तरिण्या ।
संप्रीणयामास समग्रलोकं कोकं यथाऽहर्पतिरस्तशोकम् ॥३३॥

इत्थं श्रीजिनराजवीर ! भवतः सम्यग् विधाय स्तवं,
यत्पुण्यं समुपार्जितं किल मया भावस्य नैर्मल्यतः ।
तेनाऽयं सकलोऽपि भव्यनिवहस्त्वच्छासने भक्तिमान्,
भूत्वा भद्रशतान्यवाप्य च परामालम्ब्यतां निर्वृतिम् ॥३४॥

**इति श्रीसमवसृतिस्तवः समाप्तः ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# मुनि विनयवर्धनलिखित
# एक विज्ञप्तिपत्र

– मुनि रत्नकीर्तिविज

ओळी स्वरूपे प्राप्त थयेल हस्तलिखित पत्रमां आ विज्ञप्तिका छे. ४८ श्लो प्रमाण आ विज्ञप्तिपत्रना आगला भागमां ३८ श्लोक छे. अने बाकीना श्लोको पाछळ भागमां छे.

तपगच्छीय आचार्य श्रीविजयसिंहसूरि महाराजने तेमना श्रीविनयवर्धन नाम शिष्ये लखेलो आ विज्ञप्तिपत्र छे. गुरुभगवंत मेडतामां बिराजमान छे अने पोते थराद चातुर्मास रह्या छे. जिनेश्वरनां चैत्य, जिन प्रतिमा, नगर वगेरेनुं वर्णन तथा चातुर्मा दरम्यान पोते करेला स्वाध्याय वगेरेनी वात तथा पर्युषणा पर्वमां थयेल आराधनादि वात आमां करेली छे.

एकाक्षरवृद्धिए छन्दोबद्ध अने काव्यमय विज्ञप्ति, लेखकनी संस्कृत साहि तथा काव्य अलंकारादि विशेनी विद्वत्तानी द्योतक बने छे. एक-बे-त्रण एम वर्धमानाक्ष लखाएला श्लोकोमां लगभग प्रत्येक अक्षरना बे बे श्लोको छे.

श्लोक ४३मां ४ अक्षर जेटली जग्या छोडी देवामां आवी छे अने क्यां क्यांक अशुद्धि होवाने लीधे मूळ विज्ञप्तिपत्रनी नकल होवानुं जणाय छे. घणा शब उपर अर्थनी स्पष्टता हेतु तेनो पर्याय शब्द मूकेलो छे. जे अत्रे टिप्पणमां आपेल छे. व छंद:शास्त्रना ग्रंथमांथी छंदो मेळववानो प्रयत्न कर्यो छे. ते पण टिप्पणरूपे आपेल तेमां श्लोक १२, १३, १४, १७, २९, ३६, ४३, ४४, अने ४६ आटलाना छंदो प्राप्त शक्या नथी । 'छंदोनां नाम श्लोकमां ज होवा जोईए' एवो पूज्य श्रीशीलचन्द्रस महाराजनो निर्देश एमना कह्या अनुसार छंदनी शोध करता करता वास्तविक पुरवार थ एटले जे छंदो हुं मेळवी न शक्यो ते पण ते श्लोकोमां हशे ज एवी संभावना छे ते आ विषयना विद्वज्जनोने जणाववा विनंति करुं छुं.

विज्ञप्तिपत्रमां छेल्ले 'सं १७०१ वर्षे' एवो उल्लेख छे. जे लेखनकाल जण छे. एटले विज्ञप्तिपत्र ते पहेलां लखायो होय तेम शक्यता छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्ति श्रीशं देवाऽधीशं, स्वस्ति श्रीकं स्तोष्येऽस्तेयम् ।
स्वस्ति श्रीदं भव्यध्येयं, स्वस्ति श्रीकारं नाभेयं ॥१॥

**अथ वर्ध्दमानाक्षर :**

ना कम् द्या कम् ॥१[१]॥
श्री वित् । मेऽर्हन् ॥२[२]॥ यमम् ॥
आद्यो हृद्यः । सद्योऽवद्य ॥३[३]॥
छिन्द्याद्वन्द्यो मेऽस्त्री छंद[४] : ॥४[५]॥ यमम् ॥
आदीशो दीनेशः। नाकीशोऽकीनाश : ॥५[६]॥
यस्नातो नारीभिः । विख्यातस्तं सेवे ॥६[७]॥ यमम् ॥
श्रीसार्वीया काम्या काया । मत्यामेया धीराधेया ॥७[८]॥
पास्तामाया सौवर्णाया । कन्याजेयाऽप्यन्ते हेया ॥८[९]॥
केवलिभाषा धर्मविभाषा । पाप्मजिगीषा शब्दविशेषा ॥९[१०]॥
योजनशक्तिः भाविकभक्तिः । नम्रनृपङ्क्तिः व्याकृतवृत्तिः ॥१०[११]॥
जिनवरचेतः त्रिभुवननेतः । घेनकमनाभिः शशिवदनाभिः ॥११[१२]॥
देवीभिरनिशं नीतं न च वशं । वर्य्यं वसुमती-नाथाऽपचितते ॥१२॥
प्रसृताज्ञा[१३] समाज्ञा कमनी तावकीना ।
प्रसृता हंसमाला धवला[१४] साऽसमासा[१५] ॥१३॥
सानन्दा कृतनन्दा या रामा घननादा ।
सालङ्कारविदोषा सश्लेषा मदलेषा ॥१४।
चित्रपदा नयभेदा [१६]काव्यविशेषविनोदा ।
सज्जनसन्ततिनव्या काव्यकृतां किल [१७]काव्या ॥१५॥[१८]
ततोत्तमप्रमाणिका प्रशस्तरोमराजिका
विहाय तां प्रव्रज्यया स सिद्ध इष्टसिद्धये ॥१६॥[१९] कलापकम् ॥
कामिनीप्रगीतकीर्तनं नाकिनित्यकृत्यनर्त्तनम् ।
विश्वपङ्कपुञ्जकर्तनं देशनापयोदगर्जनम् ॥१७॥

---

१-२. श्रीवृत्तम् । ३. स्त्रीवृत्तम् । ४. छन्दो वशेऽभिप्राये चेत्यादिवचनात् । ५. स्त्रीवृत्तम् । ६-७ नारीवृत्तम् । ८-९. कन्यावृत्तम् । १०-११. पङ्क्तिवृत्तम् । १२. शशिवदनावृत्तम् । १३. यशः । १४. सज्य । १५. बांधव्या । १६. ग्रन्थ । १७. मति । १८. चित्रपदावृत्तम् । १९. प्रमाणिकावृत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अष्टमी[1] यजतचन्द्रिका[2] गोधिका नयनभद्रिका ।
यस्य तं प्रणतिपद्धतिं मारुदेवमिह सादरात् ॥१८॥[3] यमम् ॥
सुधरणी विहारधोरणी सितसुधा[4]सुधा[5]धराधरा[6] ।
ध्वजपटीमनोरमा रमा जयति यत्र मेदिनीपुरे ॥१९॥[7]
यत्र चकास्त्यप्रीणनचर्चा केसरकस्तूरीविहितार्चा ।
चम्पकमालालङ्कृतमूर्ती[8] रुक्मवती तीर्थङ्करमूर्त्तिः[9] ॥२०॥[10]
कृतसुकृत[11] यतिसभा[12] वृत्ता[13] कृतसु[14] कृतयतिसभाऽऽवृत्ता ।
भवभुवन[15] पतितरी[16] यस्यां दिदिवि[17] कुटनवविमानं वा ॥२१॥[18]
[19]आर्षभिना[20] काऽऽकृतिकरणीया या नगरी नागररमणीया ।
मौक्तिकमाला वसुसुकुमारा सा रमणीवा विलसति सारा ॥२२॥[21]
[22]विपणिततिर्विपणा[23] लिमण्डिता [24]सुविपणिरा[25]पणिकाऽ[26]विखण्डिता ।
शुभमतिमर्त्तविभूतिदायिनी प्रजयति चित्रलतेव यत्र किम् ॥२३॥
यतिनिघसविहायिते[27] भाविनी रमणचरणतामरसाऽलिनी ।
सविरतिरतिरूपगुणोज्ज्वला[28] निवसति पुरि यत्र सदास्तिका ॥२४॥[29]
चकास्ति कास्तिकरमणी रमाकृतिः
सतीव सत्यधृतमतिर्दिताऽधृतिः ।
यदा तदा सुकृतपरायणा परा
प्रशस्तसंस्तवरुचिरा सदाऽऽदरा ॥२५॥[30]
अतिरससरसी सारवाऽसारिका
सजलजलजजीवा परावाटिका ।
परमपुरुषतीर्था क्षमाधिष्ठिता
सफलफलदराजी वरा बर्तते ॥२६॥[31]
जिनपवसतिदण्डता तिथिहानिता
दशवदननिवेशन स्वपराजिता ।
क्षितिजननवियोगता कचबन्धनं
विकिरगणसरोगता रिपुनाशनम् ॥२७॥[32]

---

१. चन्द्र । २. भालम् । ३. भद्रिकावृत्तम् । ४. छोह ? । ५. चन्द्र । ६. हीना । ७. मनोरमावृत्तम् । ८.काया । ९. प्रतिमा । १०. रुक्मवतीवृत्तम् । ११. शुभ । १२. गृह । १३. वर्त्तुला तथा दृढा । १४. पुण्य । १५. जल । १६. नावा १७. स्वर्ग । १८.वृत्तावृत्तम् । १९.भरत । २०.स्वर्ग । २१.अनुकूलावृत्तम् । २२.हट्ट । २३.विक्रय २४.शोभनविक्रेय । २५.वणिक् । २६.पूर्णा । २७.मालतीवृत्तम् । २८.दान । २९.उज्ज्वलावृत्तम् । ३०.रुचिरावृत्तम् । ३१.चन्द्रिकाकृत्तम् । ३२.अपराजिता वृत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उद्वाहकालकरपीडनमित्यभावे
यस्मिन्नभूद्विषयपूर्वकमन्यथा न ।
श्रीश्रीमति प्रवरपट्टनमेडताख्ये
सिंहोद्धताऽत्र भवदङ्घ्रिरजष्पवित्रे ॥२८॥[1]
यत्र स्थिराद्रनगरे नगतुङ्ग केतनं
श्रीमारुदेव जिननायकसन्निकेतनम् ।
वादित्रदुन्दुभिमृदङ्गकनादनर्तनं
सिन्धूत्थमण्डलमभादिव वृत्तमण्डनम् ॥२९॥
पटुकटुकमतमयमकरनगरं
तदपि सुगुरुगुरुगुणजपनम् ।
जयति मणिगुणनिकरजनभवनं[2]
स्रगिव नरनिगरण इह जगति यत् ॥३०॥[3]
संसृतितारणतत्परधर्ममतिप्रततिः[4]
पात्रसुपात्रयतिप्रति[5]पादनरागवती ।
श्रावक जावड–भावड–सम्प्रतिकृत्यकृतिः[5]
यत्र विभाति सदार्हतसंहतिरश्वगतिः ॥३१॥[6]
सदाऽस्तिका प्रशस्तिका सदास्तिका प्रशस्तिका ।
यथा यथा तथा तथा स्वराऽऽनरालिकाऽऽलिका ।
निरस्तपञ्चचामरा प्रशस्तपञ्चचामरा
ऽबृहद्विकर्णिकाभिधानतस्ततः स्थिराद्रतः ॥३२॥[7]
सहर्षपुलकोल्लसत्करणमेदुरानिन्द्रियो
विधाय मितवन्दनं विधिवदग्रपृथ्वीदृशा ।
ललाटघटितस्वपाणि रचयत्ययं हर्षितो
विनेय विनयादिवर्ध्दन इतीह विज्ञप्तिकाम् ॥३३॥[8]
दिवानाथे नाथे दिदिविनिलयानां शिखरिणी–
श्वरे पद्मानां भास्वति सति विभाते प्रतिदिनम् ।

---

१. सिंहोद्धतावृत्तम् । २. गृहम् । ३. स्रक्वृत्तम् । ४. लता । ५. दान । ६. कार्य । ७. अश्वगतिवृत्तम् ।
८. पञ्चचामरवृत्तम् । ८. पृथ्वीवृत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा ...... सदसि सुगुरूपासकसभा
सदिभ्यश्रेणीहर्षपुषि सकलामर्षमुषि सत् ॥३४॥[१]
चरमसमयवीरदन्तालयोत्पत्तिसारोत्तरा-
ध्ययनविरचना सवृत्तिप्रियाख्यानमध्यापनम् ।
भवजलनिधितारकादिष्टप्रज्ञापनावाचनं
वरमिति सुकृतं वरीवर्ति श्रीभवन्नामतः ॥३५॥[२]
[३]वृष[४]चन्द्र[५]कुलोत्तमे क्रमागत इति भीत्यभावे
प्रियपर्युषणाभिधानपर्वणि[६]समपर्वरत्ने ।
सुनवक्षणकल्पसूत्रवाचनमुषसि द्विसन्ध्यं [७]
सुतपस्तपनं वनीपकद्रविणविसर्जनं सत् ।
परमार्हतपोषणं मुदाऽभवद् ऋषिपर्वकृत्यं
भवदत्र भवत्क्रमस्मृतिप्रभव[८]वृषप्रभावात् ॥३६॥
तपागच्छाधीशो जयति जगदानन्ददानप्रसक्तो[९]
निजोत्पत्तिक्ष्मायां किल विजयसिंहाह्वयः सूरिराजः ।
जगत्या मत्या वा कृतगजजयस्वीययाथार्थ्यगोत्रा -
दनूचानस्वामी परिवृढनतो मेघविस्फूर्जितायाः ॥३७॥[१०]
स्वाहा[११]जक्षणवेश्मनी[१२]न्द्रभवनस्तम्बेरमाऽश्वादयो
मध्यस्थे शशिचन्द्रिकाहिम[१३]कुभृद्वक्त्रा[१४](च्चक्रा)ङ्गदुग्धादयः ।
पाताले बलिकुण्डनागपतयो जानेऽवदाता यत
स्त्रैलोक्ये यशसस्तवैष गणभृच्छार्दूलविक्रीडितम् ॥३८॥[१५]
श्रीनाथूवंशनक्षत्र[१६]सृतिदिनमणीनां कीर्तिललना
राढापूर्णात्मजैवातृकघृणिकमनी येषामतिरसात् ।
अष्टाऽऽशायां[१७] प्रगीता मनुजसुवदना योषाभिरभवत्
श्रोतुं जानीमहे किं जगति किल विधाताऽष्टश्रुतिरयम् ॥३९॥[१८]

---

१. शिखरिणीवृत्तम् । २. नाराचवृत्तम् । ३. धर्म । ४. चन्द्रशब्दः द्योतक : । ५. प्रशस्य । ६.सर्व । ७. वेलम् । ८.पुण्य । ९. तत्परः। १०. मेघ विस्फूर्जितावृत्तम् । ११. देव । १२. गृह । १३. पर्वत । १४. हंस । १५.शार्दूलविक्रीडितवृत्तम् । १६. नभः । १७. दिशि । १८. सुवदनावृत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिग्जये पराजितो रवी[१] रसाधराधिपो
ऽपरो विपक्ष आनतार्हतप्रसन्नचित्त ते ।
ज्वलत्प्रतापभूघनेन [२]मन्दरोऽदरं ग्रहा-
धिभूरपास्तवीर्यपक्षमूलमद्य मूर्च्छितो
रथस्थितो भ्रमन्नजस्रमस्त्यपीष्टवृत्तपूज्य ॥४०॥[३]
तुच्छाऽस्वच्छाऽन्यगच्छाधिपतिगजघटामत्तमातङ्गशत्रो[४] ।
[५]पौंस्नस्त्रै[६]णोपदेशाऽमृतशमितजगत्पापतापात्रिलोक्याम् ।
नित्यश्लोकप्रतापौ शशिरविमिषतस्ते ततस्तेजपुञ्जौ
श्रीमानृ[७]ग्रामगीतौ नरधृतशिरआज्ञा[८]गुरुस्र[९]ग्धरायाम्[१०] ॥४१॥
नायकदेतनूजनन ! वंशरत्न ! [११]वदनं गुणालयमहो ।
भद्रकरं प्रभाप्रसरपेशलं जयति ते गुरो वरतरम् ।
येन जितं वने [१२]कुवलयं गतं सृजति सत्तपः प्रतिदिनं
आगलमग्नमत्र[१३] भवदाननोपमितिसिद्धयेऽशनजलम् ॥४२॥[१४]
चकास्ति कनकावदातमतुलं शरीरं गुरो ! तावकीनं मुदा
सदार्हतयतीशितोऽवनतम[१५] र्तवृन्दारक स्पर्ध्दया येन वा ।
जितो विषमसायकोऽत्यसुखदायकस्तीव्रकोपादनङ्गीकृतो
यतो हि महता सह....... विग्रहोऽनर्थकार्थं भवेत् ॥४३॥
सौभाग्यालय ! वीतविभ्रमगते ! गम्भीररत्नाकरप्रसरत्तलं
लब्धाऽऽप्ताऽऽगमपारसिद्धविदुषा मेमीयते तथापि[१६] तव प्रभो ! ।
सत्पाटीगणितार्थदक्षकविना ताराऽन्तरीक्षे[१७] गुरु(परि)पन्थिभि -
[१८]र्विश्वे लान्त्यमिवा ङ्गुलैर्गजधरैर्न[१९] क्षत्रपद्येव लब्धिगुरो गुरो ॥४४॥
सम्प्रति सिद्धार्थाङ्गज[२०] [२१]दन्तालयवचन[२२] सृतिचरण[२३] करणरते
तत्रभवत्पादोदक[२४] जन्मद्वयमुषसि किल नमति नरनिकरः ।
यो भवतां तस्याऽवसथ[२५] प्राङ्गण[२६] इह विलसति वरविबुधनगो[२७]
[२८]ऽक्रोञ्चपदा पद्मापि मरुद्रत्नमसमगुणगणकलित ! वरमते ! ॥४५॥[२९]

---

१. पर्वत । २. मेरुः । ३. पञ्चचामरवृत्तम् । ४. हस्ति । ५. नरेभ्यो हितम् । ६. स्त्रीभ्यो हितम् । ७. स्त्री । ८. बृहत् । ९. माला । १०. स्रग्धरावृत्तम् । ११. जन्म । १२. पत्रम् । १३. पूज्य । १४. भद्रकवृत्तम् । १५. नर । १६. अपि निश्चियार्थे । १७. बृहत् । १८. समग्र । १९. नभः । २०. वीर । २१. मुख । २२ मार्ग । २३ चारित्र । २४. पद्य । २५. गृह । २६. जगति । २७. कल्पवृक्षः । २८. श्रेष्ठ । २९. क्रौञ्चपदावृत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीभट्टारकाऽनुत्तरकभट्टारकवरविजयदेवसूरिसदन्तिके
योनूचानरत्नं विजयसिंहो गुरुगुणर[2]सजरोहणाचलसंस्त[3]वः ।
पट्टालङ्कृतिस्तीर्थपतिवीरक्रमणकजसविधे यथा किल भासते
पात्रं गौतमोऽयं गणधरो मानुषकलुषपवनाशने भुजगेरितम् ॥४६॥
इति गुणगणराजितानां मतानां हितानां हि तेषां प्रसादान्वितानां सतां
निजकरणपरिच्छद[4]क्षेत्रवार्त्तप्रवृत्ति[5]प्रतीतोऽत्र लेखो विशेषेहितः ।
मम हरिषक[6]रालिकाम्भोदसच्चण्डवृष्टि[7]प्रपातो यतोऽतो भविष्यत्यरं
मतिमितगुरुभि[8]र्गरीयस्तरैस्तातपादैः प्रसद्य प्रसाद्योऽनवद्यो[9]हितः ॥४७॥[10]
शिशुनमतिरवधार्यस्त्रिसायं तथा तातपादाब्जनिर्ग्रन्थभृङ्गावलीना-
मनुनमति-नमती मे प्रसाद्याविहत्यानगारार्हतानां प्रणामोऽवधार्य ।
वितथविततकवित्वाक्षरार्थभ्रमौचित्यबन्धप्रबद्धं मया मौर्ख्यतो यत्
[11]प्रचितक[12]सहनपूज्यैश्च सोढव्य[13]मूर्ज्जाख्यमासे सितोऽलेखि लेखोऽथ भद्रम् ॥४८॥[14]

सं. १७०१ वर्षे ॥

---

१. उत्तम । २. मणि । ३. वर्णना । ४. वपुः । ५. सहितः । ६. वृक्षः । ७. प्राप्तः । ८. बृहस्पतिः । ९. हितकृत् । १०. चण्डवृष्टिप्रपातवृत्तम् । ११. याऽऽप्त । १२. क्षमा । १३. कार्तिक । १४. चण्डवृष्टिप्रपातवृत्तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अष्टमहाप्रातिहार्यवर्णनः अपभ्रंशभाषामय आठ पद्य

तीर्थंकर परमात्माना आठ महाप्रातिहार्यनां वर्णनो स्तोत्र स्तवन वगेरेमां पुष्क मळे छे. सामान्य रीते आवा वर्णनो संस्कृत अने प्राकृत ग्रन्थोमां अने ते ते भाषामां मळे

अहीं आपवामां आवेला आठ पद्योमां आठ महाप्रातिहार्यनुं वर्णन छे ते अपभ्रं भाषामां छे अने वत्थु(वस्तु) छंदमां छे. आ छंदमां अपभ्रंशभाषामां पुष्कळ साहित्य मळे आ आठ पद्य एक पानामां आगळ-पाछळ थईने छे. अमे राजस्थान तरफना विहारमां हता त्य एक गाममां आ प्रकीर्ण पानां जोवामां आव्या तेमां खूब झीणा अक्षरे आ आठ पद्य जोयां अ तुरत कागळमां उतारी लीधां. आजे ए अहीं प्रकाशित करवानो अवसर मळ्यो छे.

अशोकवृक्षः सुरपुष्पवृष्टिर्दिव्यध्वनिश्चामरमासनं च ।
भामण्डलं दुंदुभिरातपत्रं सत्प्रातिहार्याणि जिनेश्वरस्य ॥
अहीं पण आज क्रममां वर्णन थयुं छे.

**अशोक वृक्ष :**

पहेलुं अशोकवृक्ष छे तेना वर्णनमां थोडां शब्दमां सुंदर चित्र उपसाव्युं छे.

अशोकवृक्ष ऊंचुं, गोळ, मृदुकोमळ वैडूर्यमणि जेवा पांदडावाळुं. वळी ते पुष्पमां जे मकरन्द छे ते भ्रमरवृन्द वडे पीवाई रह्यो छे.

पवनना आंदोलन वडे ज्यारे अशोकवृक्ष डोलतुं होय त्यारे जाणे ते हर्षवश नृ न करतुं होय तेम लागे छे. आवुं अशोकवृक्ष सूर्यना किरणोने रोकतुं महावीर स्वा भगवाननी उपर शोभी रह्युं छे.

**पुष्पवृष्टि :**

जळमां उपजतां अने स्थळमां उपजतां विविध वर्णनां लाल लीलां पीळां अने गुलाबी आम पांच वर्णनां सुगंधी पुष्पोनी वृष्टि देवो करतां रहे छे. आजानु-ढींच सुधीनो ढगलो ए पुष्पोनो थतो होय छे. ए पुष्पोनी सुगंधथी खेंचाईने आवेला भ्रमरो प त्यां छे अने ए बधां पुष्पोनां वृन्त-डींटडां नीचे अने पांखडी उपर होय छे. जाणे जिन दर्शन करवा माटे आम मुख उपर न राख्या होय तेम शोभे छे.

**दिव्यध्वनि :**

हर्षथी विकसित वदन नयनवाळां हरणियां-ए वाणी ए ध्वनि सांभळी रह्यां ए दिव्यध्वनिनो गंभीर घोष पाणीथी भरेला मेघना गर्जारव जेवो लागतो हतो. अज्ञान तिमिरथी अंध बनेला भुवनना भाव प्रकट करवामां सज्ज एवी दिव्यध्वनि दशे दिशा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रसरी रही. जाणे मोहनी गाढ निद्रामां डूबेलाने जगाडवा माटे ज न होय तेम ते निरंतर दिव्यध्वनि चालु रहे छे.

**चामर युगल :**

अत्यंत श्वेत एवा चामर प्रभुजीनी बन्ने बाजु ढळी रह्या छे. ए चामरनी सफेदाइ जोतां जाणे क्षीरसमुद्रना तरंग, शरद ऋतुना चन्द्रना किरण सरखा उज्ज्वळ ए वाळ हता. तेनो हाथो माणेकजडित सुवर्णमंडित हतो. सुरेन्द्र महाराजना करकमलमां ते शोभतां हतां. जाणे प्रभुना गुणगणथी प्रमुदित थईने वारंवार नमतां न होय तेम ते शोभी रह्या छे.

**सिंहासन :**

जातिवंत सुवर्णथी घडायेलुं मणिथी सुशोभित, ऊंचुं, पहोळुं, वच्चे कंईक साकडुं सिंहासन शोभतुं हतुं. निरुपम कांतिवाळुं जाणे रूपांतर पामेलो मेरु पर्वत न होय तेवुं सिंहासन हतुं.

**भामंडल :**

आकाशमां एक पण वादळ न होय अने सहस्रकिरण वाळो सूर्य होय तेवुं भामंडल शोभतुं हतुं. वीरभगवानना मस्तकनी पाछळना भागमां ए रहेलुं पृथ्वी उपरना अंधकारने दूर करनारुं हतुं. सूर्ये जाणे जिननी सेवामां पोताना किरणो न मोकल्या होय तेवुं देदीप्यमान झळहळतुं भामंडल शोभतुं हतुं.

**देवदुंदुभि :**

देवदुंदुभिनो मधुर छतां मोटो अवाज अने तेना पडघाथी आकाश भराई गयुं. ते सांभळीने लोकोना कान चमकी जतां अने डोक ऊंची करीने जोतां. पशुगण पण कांपती आंखे ए सांभळतां अने दूर दूर जंगलमां चरतां होय तोय जिननी पासे बोलावती होय तेवी देवदुंदुभि शोभती हती.

**छत्रत्रय :**

मोटा मोतीनी माळा जेमां शोभी रही छे ते छत्रत्रयीनो विस्तार एवो छे के जाणे शरदना चन्द्रनुं मंडळ न होय तेवा छत्र हता. वळी कांतिमान, अने सुरगंगाना तरंग जेवा उज्ज्वळ हता. आवा त्रण छत्र आकाशमां शोभतां हतां.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# (वस्तुछंद)

तुंगु वट्टलु मसिणु थुड-नालु
वेरुलिय - समु बहल-दलु घणु विसालु सम-साल-सालिउ।
मयरंद-लालस-भसल-पिज्जमाणकुसुमोह मालिकउ
पवणंदोल-पवाल-करु हरिसिं नच्चइ नाइ
वीरह उवरि **असोयतरु** रविकरपहहरु भाइ ॥१॥
विट-संठिय-सुरहि-गंधड्ढ
जलथल-यरु संभवह पंचवन्न-सुरगण-विमुक्किय
आजाणु उस्सेह तहिं, गंध-लुध्ध-भमरहं अचुक्किय
सहइ समंता जिणवरह वियसिय **कुसुमह** वुट्ठि।
जिण-दंसणि उप्फुल्ल-मुह नाइ पयासइ तुट्ठि ॥२॥
हरिस-वियासिय-वयण-णयणेहिं
हरिणेहिं सुय अइ रसिण विजिय-सजल-जलवाह-गज्जिय
अन्नाण-तिमिरंतरिय-भुवण-भाव-पायडण सज्जिय
**जिण-झुणि** पसरइ दस दिसिहिं तिहुअण-जणिय पणाम
नं गुरुतम-निद्दोवहय जण-पहिबोहण काम ॥३॥
खीरसायर-लहरि-डिंडीर
पंडुरयरु सरय-ससि-किरण-सरिस-चिहुरोह-सुंदरु।
माणिक्क-मांडिय-पवर-कणय-डंडु रंजिय-पुरंदरु
सुरवइ-कर-कमलट्ठिय **चामर जुयलु** ढलेइ
नावइ गुणगणु मुइय-मणु पुणु पुणु जिणह न मेइ ॥४॥
जच्च-कंचण घडिउ मणिचित्तु
उत्तुंगु वित्थर पवरु नमिय मज्झु पेरंत उध्धरु
बहुचित्त-विछुरिय-तणु पडिम-रुववर-सीह-सिंधुरु
**सीहासणु** तिहुयण-गुरुहु सोहइ निरुवमकंति
नं रूवंतरि मेरुगिरि, धारइ तणु गुरुभत्ति ॥५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अब्भ-वज्जिय-गयणि
रवि-किरण-नियरो व्व परिभासुरइ
विप्फुरंत-तणु-किरण-रइयह
नह-विवर-परिसक्किरह तिमिर-नियर-महि-वलय-मइयह
पसरंतह भामंडलह वीरह निरुवम साहेज्ज
जिणसेवहिं पट्ठविउ दिणयरि नियकिरणोहु ॥६॥
पउर पडिरव भरिय नह विवर
बहिरीकय-जण-सवण गुरु चमक्क-उक्कन्न-वयणेहि
आयन्निय-पसुगणेहि कंपमाण-तणु तरल-नयणेहिं
सुरदुंदुहि वज्जंत तहिं गुरु निग्घोस महंत
हक्कारइ जिण पासि किर सुर-नर दूरि चरंत ॥७॥
थूल-नितूल-विमल-विललुंत
मुत्तावलि मालियह सरय-सोम-मंडल-खन्नह
मणि-खंड-परिमंडियह हरतु सारगिरी-सरिस-वन्नह
तिहुयण पहु छत्तत्तयहं सोहइ उज्जलकंति
नं सुरसिंधु-पवाहु नियफेणहं संठियपंति ॥८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सोमतिलकसूरिविरचितं करहेटकपार्श्वनाथस्तोत्रम्

–सं. विजयमुनिचन्द्रसूरि

तपागच्छीय आचार्यश्रीसोमतिलकसूरिजीए रचेल आ स्तोत्र एक प्राचीन फुटकर पानां धरावती प्रतिमांथी प्राप्त थयुं छे. प्रतिनी लखावट जोतां ते संभवतः १६मा शतकनं होवानुं लागे छे. आ स्तोत्र अप्रगट होवाथी अत्रे प्रकाशनार्थे प्रस्तुत छे.

स्वामिन् ! नमन्नर–सुरा–ऽसुरमौलिमौलि–
रत्नप्रभापटलपाटलितांऽह्रिपद्म ! ।
**पार्श्वप्रभो** ! भुवनभासनभास्कर ! त्वा–
मानौम्यमानबहुमानमहं महेश ! ॥१॥

श्री**अश्वसेन**नरनाथकुलावतंस !
**वामा**वरोदरसरोवरराजहंस ! ।
भव्याऽङ्गिमानसमहार्णवपूर्णचन्द्र !
कस्त्वां न नौति जिननायक ! वीततन्द्रः ॥२॥

विश्वत्रयार्तिहरणप्रवणप्रवीण !
विश्वत्रयीमथनमन्मथभावहीन ! ।
विश्वत्रयीसकलमङ्गलदानदक्ष !
विश्वत्रयोद्धरणधीरसरोरुहाक्ष ! ॥३॥

संसारवारिनिधितारणयानपात्र !
त्रायस्व विश्वमखिलं गुणरत्नपात्र !
कीर्तिप्रतापपरितर्जितपुष्पदन्त !
**पार्श्वप्रभो** ! भुवनभूषणपुष्पदन्त ! ॥४॥

देव ! त्वदङ्गमहसा सहसा जितेव ,
सूर्याङ्गजा जलभरं वहते हतेर्ष्या ।
त्रैलोक्यलोकमहितस्य हितस्य सर्व–
सत्त्वेषु ते कथय को न हि किङ्करोऽस्ति ॥५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्यानानलेन भवता भुवनाधिनाथ !
कर्मेन्धनं निधनमाप्यत **पार्श्वनाथ** !
त्वन्मूर्ध्नि नागपतिसप्तफणामिषेण
तेनेव धूमलहरी लसति प्रकामम् ॥६॥

स्वामिन्नशोकतरुरेष जनानशोकान्
धर्मं दिशन्निव रवैरलिनां करोति ॥
प्राज्यप्रभावभवनस्य भवादृशस्य ,
सङ्गान्न के विमतयोऽपि भवन्ति तज्ज्ञाः ? ॥७॥

मन्ये पुरस्तव विकस्वरपञ्चवर्ण-
जानुप्रमाणकुसुमप्रकरच्छलेन ।
विश्वाधिपस्य भवतो भयतः स्मरेणा-
ऽऽमुच्यन्त पञ्चविशिखान् सविषादमीश ! ॥८॥

दोषाकलङ्कजडताश्रयिणः सुधांशोः ,
साम्यं कथं भवतु ते वदनस्य देव ! ।
नित्यं श्रियः कुलगृहस्य हि यस्य गाव-
स्तापं जनस्य शमयन्ति सुधायमानाः ॥९॥

त्रैलोक्यलोचन ! सुधाञ्जनचारुरूपं ,
चन्द्रांशुचारुचमरावलीरुत्तरन्ती ।
मौलेर्गिरेरिव नदी जलपूरपूर्णा ,
पार्श्वद्वयेऽपि तव देव ! विभाति शुभ्रा ॥१०॥

भित्त्वा विभो ! नर-सुरा-ऽसुरसंसदोऽसौ ,
सिंहः सुवर्णमणिनिर्मितमासनं ते ।
संश्रित्य विज्ञपयतीव यथा भवाब्धे-
र्मां नाथ ! तारय पशुं पशुजात्युपेतम् ॥११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्भावयामि भवतस्तनुसम्भवेन ,
भामण्डलेन सितिना जिन ! भासुरेण ।
पूर्णं नभस्तलमिदं सकलं यदीति ,
नो तत्कथं मरकताभमिदं बभूव ॥१२॥

व्योमस्थितस्त्रिदशदुन्दुभिरेष हृद्यः ,
पुंसां नदन्निति विभो वदतीव नित्यम् ।
भो भो ! जगत्त्रयपतिर्जगदर्थवेदी ,
नाऽतः परोऽस्ति भुवने तदमुं श्रयध्वम् ॥१३॥

लोकत्रयैकतिलकं प्रणमन्त्यमुं ये ,
ते कीर्तिकेवलशिवत्रयमाश्रयन्ते ।
कुन्देन्दुसुन्दरतरं त्रिजगज्जनानां ,
छत्रत्रयं तव निवेदयतीव देव ! ॥१४॥

कुन्दावदातयशसं भगवन् ! भवन्तं ,
भिन्नेन्द्रनीलमणिनिर्मलकायकान्तिम् ।
कारुण्यपुण्यहृदयं हृदि यो बिभर्त्ति ,
यान्ति क्षणेन विपदः क्षयमीश ! तस्य ॥१५॥

इति श्रीमत्**पार्श्व**क्षितिवलयविख्यात**करहे**-
**टक**स्याऽलङ्कार ! त्रिभुवनपते ! नम्रशिरसाम् ।
सभावं स्तोतॄणां विदलय महामोहपटलं ,
घनं कर्मव्रातं हर वितर निर्वाणपदवीम् ॥१६॥

पूज्यभट्टारकप्रभुश्री**सोमतिलक**सूरिविरचितं
**करहेटकमण्डनश्रीपार्श्वनाथ**स्तोत्रम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री भंवरलाल नाहटा (कलकत्ता) का पत्र

१. अनुसन्धान-१२

श्रीकल्पना शेठ द्वारा संपादित **ज्ञानधर्मकृत** दामन्नक कुलपुत्रक रास में रचयिता के परिचय को स्वयं लेखकने लिखा ही है। इन ज्ञानधर्मजीके प्रशिष्य ही सुप्रसिद्ध उ.श्री देवचंद्रजी महाराज थे जो विश्वविश्रुत उच्चकोटिके आध्यात्मिक और शास्त्रवेत्ता विद्वान थे। स्थानकवासी साध्वी आरतीजीने उन पर थीसिस ग्रंथ लिखकर डाक्टरेट प्राप्त की हे।

चोथा लेख श्रीसहजकीर्त्ति उपाध्यायकृत श्रीपार्श्वनाथ् महादंडक स्तुति हे जो श्रीप्रद्युम्नसूरि महाराजने प्रकाशित किया है। ये उच्चकोटिके विद्वान थे।

जेसलमेर-लोद्रव पार्श्वनाथ तीर्थमें शिलापट्ट पर खुदा हुआ शतदलपद्म यंत्र विशिष्ट कृति हे जो जैन लेखसंग्रहमे सचित्र प्रकाशित हे। (श्रीपूरणचंद्रजी नाहर के जैन ले. सं. भाग ३ में है।)

उपाध्याय सहजकीर्तिकी प्रचुर रचनाऐं उपलब्ध हे, जिसकी सूचि यहाँ दे रहा हूं। यदि आवश्यक हो ते प्रतियां कहां उपलब्ध हे वह भी सूचित कर दिया जायगा।

१. वैराग्यशतक
२. ऋजु-प्राज्ञ व्याकरण
३. फलवर्द्धि पार्श्वनाथ महाकाव्य
४. अनेकशास्त्रसारसमुच्चय
५. बृहत्कल्पसूत्र-अर्थ
६. निशीथसूत्र-अर्थ
७. कल्पसूत्र टीका-कल्पमंजरी
८. दशवैकालिक टीका
९. वन्दित्तुसूत्र बालावबोध
१०. व्यवहार सूत्र-अर्थ
११. गौतमकुलक टीका
१२. यशोधर प्रबन्ध
१३. प्रवचनसार बालावबोध
१४. १२ व्रत टिप्पण
१५. शब्दार्थ व्याकरण
१६. सिद्धशब्दार्णवनाम कोश
१७. कलावती चौपई
१८. देवराज-वत्सराज चौपई

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१९. नरदेव चौपई
२०. राजप्रश्नीय उद्धार
२१. सागरशेठ चौपई
२२. शत्रुंजयरास सं. १६८४
२३. शांतिनाथ वीवाहमंडल-१६७९
२४. सुदर्शन चौपई
२५. हरिश्चंद्र रास
२६. उपदेश छत्तीसी
२७. नीतिसवैयाछत्तीसी
२८. व्यसनसत्तरी
२९. जेसलमेर चैत्यपरिपाटी-१९७९
३०. पार्श्वनाथ महादंडकस्तुति (अनुसंधान-१२)
३१. शतदलपद्मयंत्र-लोद्रवपुर शिला पट्ट पर

दामन्नक कुलपुत्रक रासमें प्रूफसंबन्धी अशुद्धियां है या मूल प्रतिकी ही है यह तो कहा नहीं जा सकता, पर जेरोक्स मंगाके देखें।

खंजनी परि बरसी रहयउ-खंजनी का अर्थ ढोलिया लिखा, तो खंजकी भाँति बैठे रहने-अर्थ होगा, खंज का अर्थ क्या होगा? ना - नी - ने क्रिया है।

रीहड़ वसइ नहीं पर रीहड़ वंशइ चाहिए। रीहड़ गच्छका नाम नही, किन्तु रीहड़ ओसवाल जातिमें गोत्र हे, जिसके घर अभीभी जोधपुरमें है। श्रीजिनचंद्रसूरिजी इस गोत्र के थे।

'सखरउ' का अर्थ साकर-खांड लिखा सो गलत है। सखरा का अर्थ अच्छा-बढिया या उत्तम होगा।

दिनरउ - दिनरउ अर्थात् दिन की (रा - री - रे - क्रिया)

२. अनु-१२ में जो मुनिश्री भुवनचंद्रजी का पत्र प्रकाशित हे, उसके सम्बन्धमें जिनपतिसूरि पंचाशिका जो प्रकाशित हुई हे उसके विषयमें विशेष जानकारी-

बीकानेर के बडे उपाश्रयस्थित ज्ञानभंडारमें जिनभद्रसूरि स्वाध्यायकी पुस्तिका की एक सूची देखी गई, जो अज़ीमगंज (बंगाल) के ज्ञानभंडारमें सं.१४९० की लिखी हुई महत्त्वपूर्ण प्रति थी। हम उसे देखने के लिए सं.१९९२ में अज़ीमगंज

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गए तो सूचीपत्रमें देखा नाम नहीं मिला, एक ही दिन ठहरे थे। बाद में वि.सं. २०२१ में कलकत्ता बडे मंदिरजीके १५० वर्ष प्रतिष्ठा का होने से सार्द्धशताब्दी मनायी गई तब अज़ीमगंज से ५ हस्तलिखित व सचित्र ग्रंथ श्रीमोतीचंदजी बोथरा लाये, मैंने वे देखे नहीं थे। अत: वापस भेजने के पूर्व रातमें उनका फोन आया कि यहां प्रदर्शनीमें जो ५ ग्रंथ आए हमें कब वापस भेजना हे, हम तो कुछ समझते नहीं, आपने देखे कि नहीं ? मैं तत्काल रातमें ही जाकर वे ग्रंथ ले आया। अपने मित्र श्रीलक्ष्मीचंदजी शेठको फोन में कहा – जिनभद्रसूरि स्वाध्याय ग्रंथ मिल गया है, तो उन्होंने कहा – सुबहमें आप मेरे पास भेजिए, में उसके फोटो उतार लूंगा। उन्होने फोटो उतारके भेजे। पूरे ग्रंथके सभी फोटो मेरे पास है। मैंने जैनभवनमें रखवा दिए पर मेरे उस समयकी नकल की हुई कापीसे उतारके पूज्यश्री शीलचन्द्रविजयजी महाराज को भेजे थे वे प्रकाशित किये गए। अभी वे फोटोग्राफ ललवानी गणेशजीके देहान्त के बाद में खोजकर ले आया, उससे मिलाने पर कुछ संशोधन हो सकता है।

मूल प्रति अज़ीमगंज भंडारसे चोरी हो गई।

३. अनुसंधान – १३ मिला।

इसमें कामरूप पंचाशिका पंच अशीति गाथा के अर्थमें हे या जिनभद्रसूरि स्वा. पुस्तिकाके जिनपतिसूरि पंचाशक गाथा के अर्थ से ? तथा यतिशिक्षा पंचाशिका भी ५० गाथा वाली है। क्या कारण ? हैडिंगमें पंचासिया नहीं है।

कामरूप देश तो आसाम है, जहाँ कामाख्या देवीका तीर्थ पहाड पर है। गौहाटी में पास ही है। इसमें विषय योग–स्वरोदय आदि से सम्बन्धित है।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# कविविल्हरचित-भीमछंद (अणहिलपुर)

-सं. भंवरलाल नाहटा

यह भीमछंद विल्ह कविकी रचना है, जो अणहिल पाटण के रहनेवाले थे। आबू विमलवसहीके आगे जो छोटा मंदिर है, वह इन्हीं के द्वारा निर्मापित होना चाहिए। भीमको विमलकुलितिलक लिखा है। विमल जो पोरवाल थे, विमल का अर्थ अगर विमलमंत्रीसे न लेकर शब्दार्थ करें तो ये किस ज्ञाति-वंशके थे ? हमें ६० वर्ष पूर्व उ.सुखसागरजी महाराजसे वाडी पार्श्वनाथ मंदिरके शिलालेख का फोटो मिला है। वह इन्हीं के द्वारा निर्मापित होना चाहिए, शिलालेख का फोटो पास में यहां ही है, यदि प्रकाशित हो तो भीम के वंशजों के नाम देखे जा सकते हैं।

भीम सम्बन्धी कवि देपालकृत रास श्रीधुरंधर विजयजी म.सा. ने प्रकाशित किया है। भीम केसवा शाह लिखा है।

दादाश्री जिनकुशलसूरिजीका पट्टाभिषेक पाटणमें १३७७ में हुआ था, उस समय वहां भयंकर दुष्काल था, उस समय अकाल पीडित के लिए प्रचुर अर्थव्यय किया था।

वाडी पार्श्वनाथ मंदिर की प्रतिष्ठा १६५२ के बाद श्रीजिनचंद्रसूरिजीके लाहोर से लोटते पंचनदी साधन करने के पश्चात् उन्हीं के आज्ञानुवर्ती मुनियों द्वारा पाटणमें की गई है।

## कविविल्हरचित-भीमछंद

- - - - - - - - - - - - - - - - - - - - - - - - - - नउं।

अवरराय जय मगउं सोलह, तोय न पहुंचइ भीम तंबोलह ॥१॥

तरे पट्टणह नयरिए कोइ सुणियइ, जरे केसवा साह कउ भीम भणियइ।

तरे दानरूपीहि तदउलेइ खग्गो, जरे जेणि सतहत्तरउणिहि भग्गउ ॥२॥

भरे तिणि दिणि माइ छंडे वि बाला तरे तिणि दिणिअन्न दुत्थीय काला।

तरे तिणि दिणि रखयउ लोक भगउ, जरे ॥२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तरे जावड बाहड धनं वस्तुपाला, तरे जगड पेथड साहु तेजपाला ।
तरे समर बप्पन्न पर्त्तक्ष पेषउ, भयं जय किमइ भीमकउ दान देखउ ॥३॥

तरे तिणि दिणि माइ छंडे वि बाला तरे तिणि दिणि अन्नदुत्थईय काला ।
तरे तिणि दिणि रखयउ लोक भगउ, भायों ॥४॥

भीम भलउ भुजबलिहि, भीम भावठियउ भंजइ ।
भीम विमलकुलि तिलउ, भीम रायांह मन रंजइ ॥
भीम दयालु खरउ, भीम मुख मीठड बुलइ ।
भीम धरम उधरइ, भीम धरमह धुरि तुलइ ॥
अणहिलपुर भीम पसंसियइ, भीम भीम सहु को कहइ ।
कवि कहइ विल्ह केसव० ॥ भीम जगीतहि जस लहइ ॥५॥

इति भीमछंद ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाचकश्रीसिद्धिचन्द्रगणिकृत

# न्यायसिद्धान्तमञ्जरी - टिप्पनक

-सं. मुनि कल्याणकीर्तिविजय

## भूमिका

जानकीनाथ शर्मा विरचित नव्यन्यायना एक महत्त्वपूर्ण ग्रंथ न्यायसिद्धान्त-मंजरी पर महोपाध्याय श्रीभानुचंद्रगणिना शिष्य महोपाध्याय श्रीसिद्धिचंद्रगणिए पदकृत्यो सहित टिप्पनकनी रचना करी छे। अने ते अप्रसिद्ध छे। तेनी, कर्ताए स्वहस्ते लखेली प्रत भावनगरनी आत्मानंद जैन सभामांथी (नं. ८८६) उपलब्ध छे। तेनी फोटोकॉपी परथी संपादन करी आ टिप्पनक अत्रे रजू करवामां आवे छे।

आमां आपेल मूळग्रंथना पाठो, न्यायसिद्धान्तमंजरीना श्रीसत्गुरु पब्लिकेशन्स, दिल्ही; अंतर्गत श्रीगरीबदास ऑरिएन्टल सिरीझमां ई.स. १९९०मां पुनः प्रकाशित अने श्रीगौरीनाथ शास्त्री द्वारा संपादित ग्रंथ साथे सरखाव्या छे अने तेना पृष्ठ क्रमांको टिप्पणीमां आपेल छे। ★ आवां चिह्न करीने जे टिप्पणीओ आपी छे, ते मूळ प्रतिमां कर्ताए ज स्वयं लखेली छे।

आ टिप्पनकमां एक स्थाने, शिवादित्य विरचित **सप्तपदार्थी** ग्रंथ परनी महोपाध्याय श्रीसिद्धिचन्द्रगणि (आ टिप्पनकना कर्ता) विरचित **चंद्रचंद्रिका** नामक टीकामांथी, **चित्ररूप** माटे एक संदर्भ-नोंध आपेली छे। (ते शाने माटे आपेली छे ते समजायुं नथी। विद्वानो तेना पर प्रकाश करवा कृपा करे।)

आ टीका पण अद्यावधि अप्रकाशित छे अने तेनी एक मात्र प्रति विमलगच्छना भंडार, अमदावादमां (नं. ४८, बंडल नं. ३६) छे, एवुं सिंघी जैन ग्रंथमालाना (ग्रंथांक-१५, वि.सं. १९९७ / ई.स.१९४१) श्री सिद्धिचंद्रगणिकृत भानुचंद्रचरित नामक ग्रंथनी अंग्रेजी प्रस्तावनामां List of Works by Siddhichandra, ए शीर्षक हेठळ No. 7 तरीके श्री मोहनलाल दलीचंद देशाईए नोंधेलुं छे। ते सिवाय जैन परंपरानो इतिहास-भाग ३ (पृ. ७९८)मां पण आ टीकानी नोंध आपेल छे।

**प्रस्तुत प्रतिनो परिचयः** न्यायसिद्धान्तमंजरी परना टिप्पनकनी आ **प्रत** पंचपाठी छे। परंतु मात्र २ पत्रो पर ज पंचपाठ लखेल छे। कुल पत्रो ५ छे। **लेखन** संवत् १७०६ आसो सुद १०, शुक्रवार छे। अने प्रतिनुं लेखन, टिप्पनकना कर्ता **महो.** श्रीसिद्धिचन्द्रगणिए पोतेज वडग्राममां करेलुं छे तेवुं प्रतिना अंते आपेल पुष्पिका **द्वारा** जणाय छे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## श्रीसिद्धिचन्द्रगणिकृतं
## न्यायसिद्धान्तमञ्जरी-टिप्पनकम्

श्रीसर्वज्ञं नमस्कृत्य सिद्धिचन्द्रेण धीमता ।
न्यायसिद्धान्तमञ्जर्याः पदकृत्यानि लिख्यते(न्ते) ॥१॥

ननु[1] किमिदं [2]याथार्थ्यं ? – **तद्वति तदवगाहित्वं याथार्थ्यम् । भवति हि रजते इदं रजतमिति ज्ञानं रजतत्ववति तदवगाहीति याथार्थ्यम् । [3]शुक्ताविदं रजतमिति ज्ञानं नाऽरजतत्ववति तदवगाहीति न याथार्थ्यम् ।**[4]

**ननु एवं रजते इदं रजतं नवेति संशयोऽपि प्रमा स्यादिति चेत्[5]–**

**रजतत्वांशे प्रमैव । तद्वति तदनुभवस्तत्प्रमेति प्रामाणिकाः ।** एवं च रजतत्ववति रजतत्वप्रकारकानुभवो रजतत्वप्रमेत्यर्थः । घटत्ववद्विशेष्यकत्वे सति घटत्वप्रकारकत्वं प्रामाण्यमित्यर्थः ।

**[6]अनुभवत्वं च स्मृतिभिन्नज्ञानत्वम् ।** तथा च स्मृतित्वानधिकरणं ज्ञानं अनुभवस्तेन स्मृत्यन्तरे न व्यभिचारः ।

**[7]व्यापारवदसाधारणकारणत्वं करणत्वमिति ।** कारणत्वं करणत्वमित्युक्ते कुठारदारुसंयोगेऽतिव्याप्तिः, तद्वारणाय व्यापारवदिति । कुठारदारुसंयोगस्य छिदां प्रति कारणत्वेऽपि तस्यैव व्यापाररूपतया व्यापारवत्त्वाभावात् । व्यापार-वत्कारणत्वं करणत्वमित्युक्ते ईश्वरज्ञानेऽतिव्याप्तिः । यावत्कार्यत्वावच्छिन्न पति उपादानप्रत्यक्षत्वेनाऽहेतुत्वात् । अस्मदादिव्यापारेणैवेश्वरज्ञानस्य व्यापारव-त्त्वात् । तद्व्यावृत्तयेऽसाधारणेति । ईश्वरज्ञानस्य यावत्कार्यत्वावच्छिन्नं प्रति हेतुत्वेन साधारणत्वात् ।

ननु व्यापारवदसाधारणं तत्करणं, यच्च करणं तद्व्यापारवदिति लक्ष्य-लक्षणयोरभेदः । तद्व्यावृत्तये व्यापारवदसाधारणकारणत्ववत्करणम् । तथा च

---

१. मुद्रितग्रंथे पृ. १० । २. **किं वाऽनुभवत्वमित्यधिकं** मुद्रिते । ३-४. **यथार्थम्** मु. । ५. **चेन्न** मु. ॥ ६. मुद्रिते पृ. १२ । ७. मुद्रिते पृ. १३ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करणं लक्ष्यं, व्यापारवदसाधारणक(का)रणत्वं लक्षणम्। तथाऽपि करणं इतरेभ्यो भिद्यते, व्यापारवदसाधारणकारणत्वात्। इत्थं च हेतु-साध्ययोरभेदः स्यात् तदर्थं इदं करणत्वेन व्यवहर्त्तव्यम्, व्यापारवदसाधारणकारणत्वात्। अत्र करणत्वेन व्यवहारः साध्यः, व्यापारवदसाधारणकारणत्वं हेतुः। तथा च हेतु-साध्ययोरभेदः। इति करणलक्षणपदकृत्यानि।

**तत्र[८] साक्षात्काररूपप्रमाकरणं प्रत्यक्षम्। साक्षात्कारत्वं च साक्षात् करोमीत्यनुगतप्रतीतिसाक्षिको [९]जातिविशेषः। न चेयं प्रतीतिरिन्द्रिय-जन्यज्ञान[१०]विषया, ज्ञानमात्रस्य मनोरूपेन्द्रियजन्यत्वात्, इन्द्रियाप्रतीतावपि तथा प्रतीतेश्च। नाऽपि चाक्षुषत्वादिजातिविषया, अननुगतत्वात्। यद्वा जन्यधीजन्यमात्रवृत्तिजातिशून्यज्ञानत्वं सा[११]क्षात्कारत्वमिति।** अस्याऽर्थः - धीः ईश्वरधीः, तज्जन्या धीः साक्षात्कारधीः, तन्मात्रवृत्तिजातिः साक्षात्कारत्वं, तद्वान् साक्षात्कारः। तत्र साक्षात्कारत्वशून्यत्वे सति ज्ञानत्वाभावादव्याप्तिः अनुमितावतिव्याप्तिश्च, तत्र साक्षात्कारशून्यत्वे सति ज्ञानत्वस्य सत्त्वात्। तद्वारणार्थं प्रथमजन्यपदम्, ईश्वरज्ञानस्य जनयत्वाभावात्। जन्यधीः साक्षात्कारधीः, तन्मात्रवृत्तिजातिः साक्षात्कारत्वं; तच्छून्यत्वे सति साक्षात्कारे ज्ञानत्वं नास्तीति साक्षात्कारेऽव्याप्तिः, अनुमित्यादावतिव्याप्तिश्च। अनुमितौ जन्यधीः साक्षात्कारधीस्तन्मात्रवृत्तिजातिः साक्षात्कारत्वं; तच्छून्यत्वे सति ज्ञानत्वस्य सत्त्वात्। तद्वारणार्थं द्वितीयजन्यपदम्। जन्यधीर्व्याप्तिधीः, तज्जन्याधीरनु-मितिधीः, तद्वृत्तिजातिः अनुभवत्वं; तच्छून्यत्वे सति साक्षात्कारे ज्ञानत्वाभावाद-व्याप्तिस्तद्वारणाय मात्रपदम्। जन्यधीर्निर्विकल्पकधीस्तज्जन्याधीः सविकल्पक-धीस्तन्मात्रवृत्तिधर्मः सविकल्पकत्वं; तच्छून्यत्वे सति साक्षात्कारे ज्ञानत्वा-भावादव्याप्तिः। तद्वारणाय जातिपदम्।

सविकल्पकत्वं च न जातिः, चाक्षुषत्वादिना साङ्कर्यात्। चाक्षुषत्वाभाव-समानाधिकरणत्वं त्वाचसविकल्पके, सविकल्पकत्वाभावसमानाधिकरणत्वं

---

८. मुद्रिते पृ. १४। ९. **जातिविशेष एव** मु.। १०. **ज्ञानत्व०** मु.। ११. **०ज्ञानत्वं तत्** मु.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्विकल्पकचाक्षुषे; तदुभयं सविकल्पके चाक्षुषे । परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्व(त्र) समावेशः सङ्करः ।

जन्यधीर्व्याप्तिधीः, तज्जन्या धीरनुमितिः, तन्मात्रवृत्तिजातिर्घटत्वं; तच्छून्यत्वे सति ज्ञानत्वस्याऽनुमितावपि सत्त्वादतिव्याप्तिस्तद्व्यावृत्तये शून्यपदम् । जन्यधीजन्यमात्रवृत्तिजातिरनुमितित्वादिकं, तच्छून्यस्य परमाण्वादावतिव्याप्तेः चरमज्ञानपदम् । जन्यः कुलालः, तज्जन्यो घटः, तन्मात्रवृत्तिजातिर्घटत्वं; तच्छून्यत्वे सति ज्ञानत्वस्याऽनुमितावपि सत्त्वादतिव्याप्तिस्तद्व्यावृत्तये धीपदमिति दिक् ।

जन्यधीर्व्याप्तिधीः(१) सादृश्यधीः(२) पदधीः(३), एतज्जन्या धीरनुमितिधीः(१) उपमितिधीः(२) शब्दधीः(३); तन्मात्रवृत्तिजातिः अनुमितित्वं(१) उपमितित्वं(२) शब्दत्वं च(३) । तच्छून्यत्वे सति ज्ञानत्वं साक्षात्कारमात्रे–साक्षात्कारत्वावच्छिन्नसाक्षात्कारे वर्तते । साक्षात्कारान्यावृत्तित्वे सति साक्षात्कारवृत्तित्वं साक्षात्कारत्वं इति फलितोऽर्थः ।

ननु श्रुतिवाक्यजन्यं ज्ञानं श्रवणं (१) इतरभेदानुमितिमननं (२) मुहुर्मुहुरनुचिन्तनं निद(दि)ध्यासनं, तथा च जन्या धीः श्रवणधीर्मननधीर्निद(दि)ध्यासनधीस्तज्जन्या धीः साक्षात्कारधीस्तन्मात्रवृत्तिजातिः साक्षात्कारत्वं, तत्र तच्छून्यत्वे सति ज्ञानत्वाभावात्तत्त्वसाक्षात्कारे व्यभिचार इत्यत आह–**मानसेति । मानसावृत्तित्वेन जातेर्विशेषणीयत्वात्, मानसत्वं च जातिविशेषः इत्यास्तां विस्तरः ।**

निर्विकल्पकमतीन्द्रियमिति । अतीन्द्रियत्वं च साक्षात्कारनियामकप्रत्यासत्त्यनाश्रयत्वम् । साक्षात्कारत्वनियामिका या प्रत्यासत्तिस्तदनाश्रयत्वमित्यर्थः ।

यत्र घटत्वविशिष्टो घटस्तत्सम्बन्धश्चेत्युभयं भासते, केवलं घटो भासते तादृशं ज्ञानं साक्षात्कारः; अयं घट इति ज्ञाने घटत्वतत्सम्बन्धादेर्भासमानत्वात् त व्यभिचारः स्यादित्यत आह – **अयमिति** । निःप्रकारकमित्यर्थः ।

---

१२. मुद्रिते पृ. १८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतीन्द्रियं चेत्तर्हि तत्सद्भावे किं प्रमाणमित्यत आह-तथाऽपीति।[13]

[14] **महदुद्भूतरूपस्पर्शवद्द्रव्यं त्वचो योग्यमिति।** रूपवद्द्रव्यं त्वच योग्यमित्युक्ते परमाणौ व्यभिचारस्तद्व्यावृत्तये महदिति। महद्द्रव्यस्फा(स्पा) र्शनमित्युक्ते वायौ व्यभिचारस्तद्वारणार्थं रूपवदिति। महद्रूपवद्द्रव्यं स्पार्शनमित्यु प्रभायां व्यभिचारस्तद्व्यावृत्तये महदुद्भूतरूपस्पर्शवदिति।

भवतु एक एक पटत्व-घटत्वयोः समवायः, परं समवायसिद्धिस्तु जात एवं चेत् अयं पट इति घटत्वप्रकारकं, अयं घटः इति पटत्वप्रकारकं ज्ञानं स्यात तेनाऽऽधाराधेयाख्यः स्वरूपसम्बन्ध एवाऽस्तु न समवाय इति भावः।

अन्यथाख्यातिपञ्चकमिति प्राञ्चः। अन्यथाख्यातित्रिकमिति मणिकृत स्तथा हि- यद्वस्तुपुरस्कारेण यस्य पूर्वभावोऽवगम्यते तत्तेनाऽन्यथासिद्धम्। य दण्डपुरस्कारेण दण्डत्वस्य पूर्वभावोऽवगम्यते इति दण्डत्वं दण्डेनाऽन्य-थासिद्ध

अन्यत्र क्लृप्तपूर्ववर्त्तिन एव कार्यसम्भवे तत्सहभूतत्वं अन्यथासिद्ध त्वम्। यथाऽन्यत्र क्लृप्तपूर्ववर्त्तिनो गन्धप्रागभावादेव गन्धोत्पत्तौ तत्सहचरि रूपप्रागभावो गन्धेनाऽन्यथासिद्धः।

एकं प्रति पूर्वभावे गृहीते एव परं प्रति पूर्वभावो गृह्यते तत्तेनाऽन्यथ सिद्धः। यथाऽऽकाशस्य शब्दं प्रति पूर्वभावे गृहीते एव अपरं घटादिकं प्र पूर्वभावो गृह्यते, तत्तेनाऽन्यथासिद्धः। इत्यन्यथाख्यातित्रिकमिति स्थितम्॥

**विशिष्टानुभवे[15] हि विशेषणज्ञानं कारणं न तु स्मरणेऽपि**, विशेषण ज्ञानं विनाऽपि स्मरणोपपत्तेः। अन्यथाऽनवस्था स्यात्। कथमनवस्था भवती चेत् - शृणु - अनुभवात्मकविशिष्टज्ञानं प्रति स्मरणात्मकविशिष्टज्ञा विशेषणज्ञानत्वेन कारणम्, विशिष्टज्ञानमात्रस्य विशेषणज्ञानजन्यत्वात् अनुभवात्म-कविशिष्टज्ञानजनकीभूतस्मरणात्मकविशिष्टज्ञानं प्रत्यपि विशेषण

---

१३. मुद्रिते पृ. २०। १४. मुद्रिते पृ. ३७। **महदुद्भूतस्पर्शवद्द्रव्यत्वेनैव त्वचो योग्यता** इति मु.। १५. मुद्रिते पृ. २२।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानत्वेन हेतुत्वे वाच्ये तद्विशेषणज्ञानमपि विशिष्टज्ञानम् । तथा च तत्राऽपि विशेषणज्ञानं कारणम् । तदपि विशिष्टज्ञानम् । तत्राऽपि विशेषणज्ञानं कारणं, एवमनवस्था स्यात् ।

[१६] **ननु संयोगो न प्रत्यासत्तिरित्यत्र** द्रव्यग्रहत्वावच्छिन्नं प्रति संयोगत्वेन कारणता । तथा च द्रव्यग्रहत्वेन संयोगत्वेन कार्यकारणभावः इति सिद्धम् ।

ननु चक्षुः संयुक्तघटादिसमेवतग्रहे क्लृप्तः संयुक्तसमवायः । तेनैव चक्षुःसंयुक्तकपालादिसमवेतघटादिग्रहसम्भवे संयोगस्य प्रत्यासत्त्यन्तरकल्पने गौरवमिति चेत् । न । द्रव्यमात्रस्य संयुक्तसमवायेन ग्रहासम्भवात्, आत्मनो निरवयवत्वेनाऽसमवेतत्वात्, संयोगेनैव मनसाऽऽत्मग्रहात् ।

आत्मनि दुःखाभाव इत्यत्राऽधिकरणस्याऽभावत्वे आत्मन एवाऽभावापत्तिः । अभावस्याऽधिकरणात्मकत्वे दृढं दूषणं दत्तम् । किञ्चाऽधिकरणा-त्मा अभावस्तदा कपाले घटो भविष्यतीति प्रतीत्याऽस्ति कपाले पूर्वं घट प्रागभावस्तस्य कपालाधिकरणत्वेन स चेत् कपालात्मा तदा कपालस्य सर्वदा सत्त्वाद् घटे विनष्टेऽपि कपाले घटप्रागभावोऽस्तीति प्रतीत्यापत्तिः ।

अथाऽभावस्याऽधिकरणाद्भिन्नत्वे नैयायिकस्य दूषणं दत्ते – यदेतदिति । घटाभावो नाऽस्तीति प्रतीत्या घटाभावाभावोऽप्यधिकः स्याद्, सत्वधिकः इति चेत्, तदा घटाभावाभावो नास्तीति प्रतीत्या तदभावोऽप्यधिकः स्यात् । तत्राऽपि घटाभावे घटो नाऽस्तीति प्रतीत्या तदप्यभावोऽधिकः स्यादेवमनवस्थाभिया घटभावाभावः केवलमधिकरणमेवाऽऽगतम् । तथा चाऽधिकरणमेव सर्वत्राऽभावोऽस्तु, पूर्वोक्तं दूषणमपि भवतामेवाऽऽगतम् । तत्राऽऽहुः घटाभावाभावे घटो नाऽस्तीति प्रतीतेस्तदभावस्तु घटाभाव एव, घटाभावाभावस्तु घटाभाव एव । तथा च नाऽनवस्थेति प्राञ्चः ।

**तैजसमिन्द्रियं चक्षुरिति** [१९] । तैजसं चक्षुरित्युक्ते दीपसुवर्णादौ

---

१६. मुद्रिते पृ. ४४ । १७. मुद्रिते पृ. ५३ । १८. मुद्रिते पृ. ५३ । १९. मुद्रिते पृ. ६४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यभिचारस्तद्वारणाय इन्द्रियमिति । इन्द्रियं चक्षुरित्युक्ते घ्राणादावतिव्याप्तिस्त - द्वारणाय तैजसमिति । यद्वा [१९] **रूपग्राहकमहदिन्द्रियं चक्षुरिति** लक्षणान्तरं रूपग्राहकमिन्द्रियं चक्षुरित्युक्ते मनसि व्यभिचारः, मनसः सर्वग्राहकत्वात्। तद्वारणाय महदिति। मनसोऽणुत्वान्न व्यभिचार इति भावः। महदिन्द्रियं चक्षुरित्युक्ते घ्राणादौ व्यभिचारस्तस्याऽपि महदन्द्रियत्वात्। तद्वारणाय रूपग्राहकमिति, घ्राणं तु गन्धग्राहकं न रूपग्राहकमिति भावः। रूपग्राहकं चक्षुरित्युक्ते आत्मनि व्यभिचारः, आत्मनः सर्वज्ञानजनकत्वात्। तद्वारणाय इन्द्रियमिति। एवं सर्वेष्वपि इन्द्रियलक्षणेषु अतिव्याप्त्यादिदोषाः स्वयमेव परिच्छेद्याः।

तथा च [२०] **स्पर्शग्राहकं महदिन्द्रियं वा त्वक्। आप्यमिन्द्रियं रसग्राहकं महदिन्द्रियं वा रसनम्। पार्थिवमिन्द्रियं गन्धग्राहकं महदिन्द्रियं वा घ्राणम्। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्** [२१]। **महत्पदं** [२२] **सर्वत्र मनोवारणाय। निःस्पर्शमणु मन इति।** अणु मनः इत्युक्ते पार्थिवपरमाण्वादौ व्यभिचारस्तस्याऽप्यणुत्वात्। तद्वारणाय अणु इति।

[२३] **संयोगत्वावच्छेदेन द्रव्यजन्यत्वावधारणादिति।** संयोगत्वावच्छेदेन द्रव्यजन्यत्वेन कार्यकारणभावात्। यो यः संयोगः स द्रव्यजन्यो भवतीत्यर्थः।

[२४] **वायावुद्भूतग्रहानापत्तेरिति।** वायुः उद्भूतरूपवान्न इत्यत्राऽन्योन्याभावग्रहे अनुपलब्धिः कारणं तस्य लक्षणं योग्येऽधिकरणे इति गर्भितम्। तत्र वायोर्योग्याधिकरणत्वाभावेन व्यभिचरितं सत् न वायावुद्भूतरूपवदन्योन्याभावं गृह्णातीत्यर्थः।

[२५] **अनुमितिकरणं अनुमानम्। अनुमितित्वं च अनुमिनोमीत्यनुभवसिद्धो जातिविशेषः। यद्वा जन्यज्ञानजन्यत्वाव्यभिचारि जन्यशब्दधी-**

---

१९. मुद्रिते पृ. ६४। २०. **वायवीयमिन्द्रियं स्पर्शग्राहकं** मु.। मुद्रिते पृ. ६४। २१. **शब्दग्राहकं महदिन्द्रियं वा.** - इत्यधिकं मु.। २२. **सर्वत्र** इत्यधिकमत्र मुद्रितापेक्षया। २३. मुद्रिते पृ. ६६। २४. मुद्रिते पृ. ६१। **वायावुद्भूतरूपवद्भेदग्रहानापत्तेः** इति मु.। २५. मुद्रिते पृ. ६८।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जन्यत्वव्यभिचारि जातिमदनुभवत्वं** अनुमितित्वमिति लक्षणान्तरम् ।

जन्यशब्दधीजन्यत्व(त्वा)व्यभिचारि जातिमदनुभवत्वं इति चेत् - प्रत्यक्षत्वजातिमादाय व्यभिचारः । तथा हि - जन्या चाऽसौ शब्दधीश्च जन्यशब्दधीः। उपमितिः शाब्दधीश्च उभे अपि जन्यं यत् पदज्ञानं तज्जन्ये अतिदेशवाक्यार्थज्ञानं शब्दविषयकत्वाच्छब्दज्ञानं भवति उपमितिश्च तज्जन्या भवति। अथ च शब्दज्ञानमपि पदज्ञानजन्यं भवति, तज्जन्यत्वं उपमितौ शाब्दे च । तदसमा-नाधिकरणा या जातिः साक्षात्कारत्वरूपा तद्वान् यः अनुभवः साक्षात्कारः स अनुमितिरिति स्यात् ; तद्वारणाय जन्यज्ञानजन्यत्वाव्यभिचारीति। जन्यज्ञानं व्याप्तिज्ञानं, तज्जन्यत्वं अनुमितौ। अनुमितिनिष्ठो धर्मस्तत्समानाधिकरणा या जातिः प्रत्यक्षं च जन्यशब्दधीजन्यं न भवति ।

ननु वाक्यप्रत्यक्षादौ जन्यशब्दधीजन्यत्वाव्यभिचारित्वात् प्रत्यक्षत्वं न जन्यशब्दधीजन्यत्वव्यभिचारीति चेन्न । प्रत्यक्षत्वसामानाधिकरण्येन जन्यशब्द-धीजन्यत्वसत्त्वेऽपि प्रत्यक्षत्वावच्छेदेन जन्यशब्दधीजन्यत्वव्यभिचारित्वादति-व्याप्तिरिति सूचयितुं **नित्ये**[२६] **निर्विकल्पके** चेति ।

धर्मवदनुभवत्वं अनुमितित्वं इत्युक्ते सविकल्पकत्वमादाय प्रत्यक्षत्वेऽति-व्याप्तिः । सविकल्पकं जन्यज्ञानजन्यं भवति, सविकल्पकस्य निर्विकल्पक-जन्यत्वात् । अथ च जन्यशब्दधीजन्यं न भवति । तद्वारणाय जातिपदम् । सविकल्पकत्वं च न जातिः, चाक्षुषत्वादिना साङ्कर्यात् । चाक्षुषत्वाभावोऽस्ति त्वाचसविकल्पके, तत्र सविकल्पकत्वाभावो नाऽस्ति। सविकल्पकत्वा-भावोऽस्ति निर्विकल्पके, तत्र चाक्षुषत्वाभावो नाऽस्ति । तदुभयं च चाक्षुषे सविकल्पके । इति दिक् ।

---

★ प्रथम; पर्वते धूमदर्शनं (१), ततः सहचारस्मरणं (२), ततो धूमो वह्निव्याप्य इति व्याप्तिज्ञानं (३), ततो वह्निव्याप्यधूमवान् पर्वत इति परामर्शलक्षणो व्यापारः (४), ततः पर्वतो वह्निमानित्यनुमितिः ।

२६. मुद्रिते पृ. ७० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**का पुनरत्यन्ताभावे योग्यतेति ।** ग्रहणयोग्योऽत्यन्ताभावः कः इत्यर्थः । **योग्यमात्रप्रतियोगिके योग्यधर्मावच्छिन्नप्रतियोगिताकत्वमिति ।** योग्यधर्मावच्छिन्नप्रतियोगिता यस्य स योग्यधर्मावच्छिन्नप्रतियोगिताकः । अभावो ग्रहणयोग्यः इत्युक्ते भूतले घट-पिशाचौ न स्तः इत्यभावग्रहापत्तेः । योग्यधर्मो घटत्वं तदवच्छिन्नो घटः, तत्प्रतियोगिताकत्वात् । तद्वारणार्थं योग्यमात्रप्रतियोगिक इति । पिशाचस्य प्रतियोगिनः अयोग्यत्वान्न योग्यमात्रप्रतियोगिताक इत्यर्थः । योग्यमात्रप्रतियोगिको ग्रहणयोग्यः इत्युक्ते गुरुत्ववान् घटो नाऽस्तीत्यभाव-ग्रहापत्तेः, गुरुत्वविशिष्टघटरूपप्रतियोगिनो योग्यत्वात् । तद्वारणार्थं योग्यधर्मावच्छिन्नप्रतियोगिताक इति । अयं योग्यधर्मावच्छिन्नप्रतियोगिताको न भवति गुरुत्वस्याऽतीन्द्रियत्वात् ।

बहिरिन्द्रियजन्यलौकिकद्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति आलोकसंयोगावच्छेदेन चक्षुःसंयोगः कारणम् । बहिरिन्द्रियजन्यलौकिकद्रव्यसाक्षात्कारत्वेन आलोकसंयोगावच्छिन्नचक्षुःसंयोगत्वेन कार्यकारणभावः इति प्राञ्चः । तन्न । क्वचिच्चक्षुःसंयोगस्य पूर्ववृत्तितया तदभावात्, आलोकसंयोगावच्छिन्नचक्षुः-संयोगाभावादित्यर्थः । तत्र हि चक्षुःसंयोगावच्छिन्नलोकसंयोगस्य सत्त्वात् द्रव्यचाक्षुषं न स्यात् ।

---

२७. मुद्रिते पृ. ६२ ।

★ (प्रतिना पत्र क्रमांक २/१ ना हांसियामां टिप्पणी आपेली छे। मूलग्रंथमां तथा टिप्पनकमां तेनो संबंध कोनी साथे छे ते स्पष्ट थतुं नथी –

"न च चित्ररूपे मानाभावः, चित्रावयवि[नि] चाक्षुषत्वानुपपत्त्या तदङ्गीकारात्। रूपादीनां व्याप्यवृत्तितानियमेन यावद्रूपाणामेकत्राऽवृत्तिः । न च महत्त्वे सत्युद्भूत-रूपवत्समवेतत्वमेव चाक्षुषत्वप्रयोजकमिति वाच्यम्, यत्र चित्ररूपावयवारब्ध एवाऽवयवी तत्र रूपवत्समवेतत्वाभावात् । न च तत्राऽपि रूपवत्परम्पराश्रितत्वम-स्तीति वाच्यम् , परम्पर(रा)या अननुगमात् रूपवत्समवेतत्वापेक्षया रूपवत्त्वस्य लघुत्वाच्च । इति **चन्द्रचन्द्रिकायां** उपाध्याय**श्रीसिद्धिचन्द्रगणि**कृतायां **सप्तपदार्थी**टीकायाम् ।"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु आलोकसंयोग-चक्षुःसंयोगयोःसमानकालीनत्वस्थले विनिगमना-विरहात् द्रव्यप्रत्यक्षत्वेन आलोकसंयोगावच्छिन्नचक्षुःसंयोगत्वेन चक्षुः-संयोगावच्छिन्नालोकसंयोगत्वेन चेति कार्यकारणभावद्वयावश्यकत्वात् यत्र चक्षुः-संयोगः पूर्वं जातः तत्र द्रव्यप्रत्यक्षत्वेन आलोकसंयोगावच्छिन्नचक्षुःसंयोगत्वेन कार्यकारणभावेऽप्यक्षतिरिति चेन्न । आलोकसंयोगावच्छिन्नचक्षुःसंयोगत्वेन चक्षुःसंयोगावच्छिन्नलोकसंयोगत्वेन च कारणत्वे आलोकसंयोगे चक्षुःसंयोगः, चक्षुःसंयोगे आलोकसंयोगः इति प्रतीत्यापत्तेः । यथा शाखावच्छेदेन कपिसंयोग अत्र शाखायां कपिसंयोग इति । तस्माद् बहिरिन्द्रियजन्यलौकिकप्रत्यक्षत्वेन आलोकसंयोगावच्छेदकावयवावच्छिन्नचक्षुःसंयोगत्वेन कार्यकारणभाव इति नव्याः । इत्थं च आलोकसंयोगस्य अधिकरणावच्छेदका ये अवयवास्तदधि-करणकः चक्षुःसंयोग इति प्रतीतिरपि निराबाधा ।

विनिगमनाविरहात् आलोकसंयोगावच्छेदकावयवावच्छिन्नचक्षुःसंयोगत्वेन चक्षुःसंयोगावच्छेदकावयवावच्छिन्नालोकसंयोगत्वेनेति कार्यकरणभावद्वयं तु तदावश्यकमेवेति । तन्न । कादाचित्कालोकसंयोगस्याऽवच्छेदकत्वमादाय तमःकालीनचक्षुःसंयोगात् द्रव्यप्रत्यक्षापत्तिः, आलोकसंयोगावच्छेद-कावयवावच्छेदेन चक्षुःसंयोगस्य सत्त्वात् ।

चक्षुःसंयोगकालीनालोकसंयोगावच्छेदकावयवावच्छिन्नचक्षुःसंयोगत्वेन आलोकसंयोगकालीनचक्षुःसंयोगावच्छेदकावयवावच्छिन्नआलोकसंयोगत्वेन च कारणत्वे तु गौरवम् । तस्मात् आलोकसंयोगावच्छेदकावच्छेद्यत्वसम्बन्धेन आलोकसंयोगविशिष्टचक्षुःसंयोगत्वेन कारणता इति नव्यतराः । तन्न, विनिगम-नाविरहात् *आलोकसंयोगावच्छेदकावच्छेद्यत्वसम्बन्धेन आलोकसंयोगविशि-चक्षुःसंयोगत्वेन चक्षुःसंयोगावच्छेदकावच्छेद्यत्वसम्बन्धेन चक्षुःसंयोगविशि-आलोकसंयोगत्वेनेति कार्यकारणभावद्वयमावश्यकम् । अवच्छेदकगौरवमधिक-मिति ।

---

* आलोकसंयोगावच्छेदका ये अवयवा, भित्त्याद्यवयवा इत्यर्थः, तन्निरूपितं अवच्छे-द्यत्वं च चक्षुःसंयोगे वर्त्तते । अनेन सम्बन्धेन आलोकसंयोगविशिष्टश्चक्षुःसंयोगः कारणं, तेन तमःकालीनचक्षुःसंयोगान्न घटप्रत्यक्षत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च यस्य पटस्याऽर्धं तमसि अर्धं चाऽऽलोके तत्र तमोऽवच्छेदे चक्षुःसंयोगात् पटप्रत्यक्षतापत्तिः, ★स्वावच्छेदकावच्छेद्यत्वसम्बन्धेन आलोकसंयोगविशिष्टचक्षुःसंयोगस्य सत्त्वात्। न च तत्रांश एव पटनिष्ठालोकसंयोगस्याऽवच्छेदकाः प्राक् अंरववच्छेदेन तन्तावालोकसंयोगे तदसम्भवात्। अवच्छेदकता सम्बन्धेन संयोगत्वावच्छिन्नं प्रति अवच्छेदकतासम्बन्धेन संयोगस्य प्रतिबन्धकत्वात्। तस्माद् द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति विजातीयचक्षुःसंयोगः आलोकसंयोग हेतुरिति सङ्क्षेपः ।

अत्र सामान्यतो गृहीतगवयपदप्रवृत्तिनिमित्तस्य विशेषजिज्ञासया कीदृ गवय इति प्रश्ने गोसदृशो गवय इत्युत्तरवाक्यात् गोसदृशो गवयपदप्रवृत्तिनिमित्तवानित्याकारातिदेशवाक्यार्थशाब्दधीः । प्रश्नोत्तरस्थगवयपदयोर्विशिष्य ऽगृहीतशक्तिकयोर्गवयपदप्रवृत्तिनिमित्तवल्लाक्षणिकत्वात् सा करणम्। त साहृश्यविशिष्टपिण्डदर्शनं तत्सहकारि। ततोऽतिदेशवाक्यार्थस्मृतिः। सा व्यापा तत उपमितिरित्येके । साहृश्यविशिष्टपिण्डदर्शनमेवोद्बोधकीभूत स्वजन्यातिदेशवाक्यार्थस्मृतिव्यापारकं करणमित्यन्ये । परे तु अतिदेशवाक्यर्थस्मृतेरव्यवहितोत्तरमेव साहृश्यविशिष्टपिण्डदर्शने पुनस्तत्स्मृत्यपेक्षाभावात् तस् कथं व्यापारता ? न चाऽतिदेशवाक्यार्थशाब्दाद्यनुभव एव तत्स्मृतिद्वारा करणमित् मतं युक्तं, साहृश्यविशिष्टपिण्डदर्शनवतः अतिदेशवाक्यार्थशाब्द-बोधोत्तरं क्वचिदुपमितिसम्भवात् । तस्मात् ज्ञानत्वेनोपमितिकरणत्वं ज्ञानमा व्यापारोऽतिदेशवाक्यार्थज्ञानं साहृश्यविशिष्टपिण्डदर्शनं चेत्याहुः ।

हेतुज्ञानं अनुमानं, वह्निव्याप्यधूमवान् पर्वतः इति व्यापारः, प वह्निमानित्यनुमितिः ।

ननु पर्वतो वह्निमानिति नाऽनुमितेराकारः, किन्तु वह्निव्याप्यधूमवान् प वह्निमानित्याकारा; अन्यथा पर्वतो वह्निमानित्यनुमितित्वावच्छिन्नं प्र वह्निव्याप्यधूमवान् पर्वत इति परामर्षत्वेन कारणत्वं न स्यात्, वह्निमानित्यनुमि

---

★ आलोक ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्निव्याप्यालोकवानिति परामर्षादपि सम्भवात् व्यतिरेकव्यभिचारः । न च लिङ्गकानुमितित्वावच्छिन्नं प्रति धूमपरामर्षत्वेन हेतुत्वं, तथा च आलोक-मर्षजन्यानुमितिस्तु न धूमलिङ्गका येन व्यभिचारः स्यादिति वाच्यम् । धूमलिङ्गकत्वं च धूमज्ञानज्ञाप्यत्वं तथा च यत्र धूमः पक्षतावच्छेदकत्वेन भातस्तत्र धूमवान् पर्वतो वह्निव्याप्यालोकवानिति परामर्षजायां पर्वतो वह्निमानित्याका-कायामनुमितौ व्यभिचारः इति चेन्न । पर्वतो वह्निमानित्यनुमितित्वावच्छिन्नं प्रति स्वाव्यवहितपूर्वकालवृत्तिधूमपरामर्षस्य व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन कारणता। अस्ति च आलोकपरामर्षजन्यानुमितावपि व्याप्तिप्रकारकपक्षधर्म-ताज्ञानजन्यत्वं आलोकस्याऽपि धूमवद्वह्निव्याप्यत्वात् पक्षधर्मत्वाच्चेति ★सङ्क्षेपः।

[२८]**जन्यपदज्ञा[२९]नजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिशून्यत्वे सति पदविषयकत्वाव्यभिचारिजातिशून्यधीत्वं शाब्दत्वम् ।** जन्यं यत् पदज्ञानं तज्जन्यत्वस्य व्यभिचारिणी जन्यपदज्ञानजन्यत्वासमानाधिकरणेत्यर्थः । एतादृशी अनुभवत्वस्याऽव्यापिका या जातिः प्रत्यक्षत्वानुमितित्वादितच्छून्यत्वे सति या पदविषयकत्वाव्यभिचारिणी जातिः उपमितित्वम्। तच्छून्यत्वे सति धीत्वं शाब्दत्वम् । प्रत्यक्षत्वादीनां अनुभवत्वाव्यापकत्वं तु यत्र यत्र अनुभवत्वं तत्र तत्र प्रत्यक्षत्वादीनामसत्त्वात् ।

पदविषयकत्वाव्यभिचारिजातिशून्यत्वे सति धीत्वं शाब्दत्वमित्युक्ते प्रत्य-क्षादावतिव्याप्तिः; पदविषयकत्वाव्यभिचारिणीजातिः उपमितित्वं, तच्छून्यत्वे सति धीत्वस्य प्रत्यक्षादौ सत्त्वात् । तद्वारणाय जन्यपदज्ञानजन्यत्वव्यभिचार्य-नुभवत्वाव्यापकजातिशून्यत्वे सति प्रत्यक्षादौ पदविषयकत्वाव्यभिचारिजातिः उपमितित्वं, तच्छून्यत्वे सति धीत्वस्य सत्त्वेऽपि जन्यपदज्ञानजन्यत्वव्यभिचा-रिणी या अनुभवत्वाव्यापिका जातिः प्रत्यक्षत्वादि तच्छून्यत्वाभावात् जन्यपद-ज्ञानजन्यत्वव्यभिचारिजातिमत्त्वे सति पदविषयकत्वाव्यभिचारिजातिशून्यत्वे सति धीत्वमित्युक्ते प्रत्यक्षादावतिव्याप्तिः, प्रत्यक्षादौ जन्यपदज्ञानजन्यत्वव्यभिचारिजा-

★ इदं अनुमानलक्षण एव लेख्यम्। २८. मुद्रिते पृ. १५०। २९. ०**धीजन्यत्व**० मु.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिस्तस्याः सत्त्वात्। पदविषयकत्वाव्यभिचारिजातिः उपमितित्वं तच्छून्यत्वस्य सत्त्वाच्च। तद्वारणाय प्रथमं जातिशून्यत्वमिति पदम्। अनुभवत्वाव्यापकजातिशून्यत्वे सति पदविषयकत्वाव्यभिचारिजातिशून्यत्वे सति धीत्वमित्युक्तेऽसम्भवः, शाब्दे ज्ञाने पदविषयकत्वाव्यभिचारिजातिः उपमितित्वं तच्छून्यत्वस्य सत्त्वेऽपि अनुभवत्वाव्यापिका जातिः शाब्दत्वं तच्छून्यत्वस्याऽसत्त्वात्। तद्वारणाय जन्यपदज्ञानजन्यत्वव्यभिचारित्वं अनुभवत्वाव्यापकजातेर्विशेषणं तथा च जन्यपदज्ञानजन्यत्वव्यभिचारिणी या अनुभवत्वाव्यापिका जातिः प्रत्यक्षत्वादि तच्छून्यत्वस्य शाब्दे सत्त्वात्। नाऽसम्भवः, जन्यपदज्ञानजन्यत्वव्यभिचारिजातिशून्यत्वे सति पदविषयकत्वाव्यभिचारिजातिशून्यधीत्वमित्युक्ते असम्भव एव। शाब्दज्ञाने पदविषयकत्वाव्यभिचारिणी जातिः उपमितित्वं, तच्छून्यस्य सत्त्वेऽपि जन्यपदज्ञानजन्यत्वव्यभिचारिणी जातिः अनुभवत्वं तच्छून्यत्वस्याऽसत्त्वात्। तद्वारणाय अनुभवत्वाव्यापकत्वं जातिविशेषणम्। तथा च जन्यपदज्ञानजन्यत्वव्यभिचारिणी अनुभवत्वस्याऽव्यापिका या जातिः प्रत्यक्षत्वादि तच्छून्यत्वस्य शाब्दे सत्त्वान्नाऽसम्भवः।

पदधीजन्यत्वव्यभिचारिअनुभवत्वाव्यापकजातिशून्यत्वे सति पदविषयकत्वाव्यभिचारिजातिशून्यधीत्वमित्युक्तेऽनुमितावतिव्याप्तिः। पदधीः ईश्वरधीः, तज्जन्यत्वव्यभिचारिणी नित्यनिष्ठा जातिस्तच्छून्यत्वस्य पदविषयकत्वाव्यभिचारिणी जातिः उपमितित्वं तच्छून्यत्वस्य च अनुमितौ सत्त्वात्। तद्वारणाय प्राथमिकं जन्यपदम्। तथा च जन्यपदधीजन्यत्वव्यभिचारिणी अनुभवत्वाव्यापिका जातिः अनुमितित्वादि तच्छून्यत्वस्याऽनुमितौ सत्त्वान्नाऽतिव्याप्तिः। जन्यपदज्ञानजन्यत्वव्यभिचारिअनुभवत्वाव्यापकजातिशून्यत्वे सति धीत्वमित्युक्ते उपमितावतिव्याप्तिः। तद्वारणाय पदविषयकत्वाव्यभिचारिजातिशून्यत्वे सतीति। तथा चौपमितौ जन्यपदज्ञानजन्यत्वव्यभिचारिअनुभवत्वाव्यापक-जातिः प्रत्यक्षत्वादि तच्छून्यत्वस्य सत्त्वेऽपि पदविषयकत्वाव्यभिचारिजातिः उपमितित्वं, तच्छून्यत्वस्याऽसत्त्वात् नाऽतिव्याप्तिः। जातावतिव्याप्तिवारणाय धीपदम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साहित्यश्रये न लक्षणा। धवखदिरौ छिन्धीत्यत्र धवखदिरमात्रप्रतीत्या क्लृप्तशक्त्यैवोपपत्तेः धवपदस्य धवे शक्तिः खदिरपदस्य खदिरे शक्तिस्तथा च द्वाभ्यां शक्तिभ्यामेव धवखदिराविति स्वरूपद्वयप्रतीतेः न साहित्याश्रये लक्षणेति भावः। नीलोत्पलमित्यत्र नीलाभिन्नमुत्पलमित्यर्थः। तथा चोत्पलपदस्य नीलाभेदविशिष्टोत्पले लक्षणेति केचित्। तन्न। अभेदस्य संसर्गविधयैव भानात्।

[३०]**प्रथमायामिति**। घटपदोत्तरप्रथमायाः षष्ठ्यर्थे वा लक्षणा। तथा च 'न घटः पट' इत्यत्र घटसम्बन्धवदभाववान् पटः। इत्थं च घटसम्बन्धरूपः षष्ठ्यर्थः अभावोपरि प्रकारतया भासत इति।

विभक्त्यर्थप्रकारको नामाऽर्थविशेष्यकः शाब्दबोधः, स च भेदेनैवोपपन्नः। कथमिति ? भारतस्य श्रवणमित्यत्र भारतकर्मकं श्रवणमित्यर्थः। स च विना लक्षणामनुपपन्नः।

[३१]**तथे**ति। घटो नाऽस्तीत्यत्राऽपि प्रथमायाः षष्ठ्यर्थलक्षणा। तथा च घटो नाऽस्तीत्यत्र घटसम्बन्ध्यभावोऽस्तीत्यर्थः।

[३२]**एकस्या**मिति। एकाया बहुत्ववैशिष्ट्याद् बहुत्वस्यैकत्वे लक्षणा।

घटः पटो नेत्यत्र पटाभाववान् घट इति शाब्दबोधः। तथा च घटः पटाभावस्याऽऽश्रयः आश्रयी च घटाभावः। एवं च पटाभाव-घटयोः आश्रयाश्रयीभावः सम्बन्धः, ननु पटाभाव-घटयोः कथं अन्वयः ? नामार्थयोर्भेदेनाऽन्वयस्याऽव्युत्पत्तेः। ननु घटः पटो नेत्यत्र घटपदस्याऽर्थो घटः, पटपदस्याऽर्थो पटः, नञर्थश्चाऽभावः। नञुत्तरलुप्ता या षष्ठी तदर्थः सम्बन्धः। तदुपस्थितिश्च नञुत्तरलुप्तषष्ठीस्मरणात्। तथा च घटो नेत्यस्य घटाभावसम्बन्ध इत्यर्थः। वाक्यार्थस्तु घटाभावसम्बन्धवान् घटः। एवं च न नामार्थयोरन्वयः किन्तु विभक्त्यर्थनामार्थयोरिति। स च भेदेनाऽप्युपपन्न इति चेत्, न। [३३]**षष्ठीलोप-मजानतोऽपीति**।

---

३०. मुद्रिते पृ. २२९। **प्रथमाया** इति मु.। ३१. मुद्रिते पृ. २३४। ३२. मुद्रिते पृ. २२९।
३३. मुद्रिते पृ. २३१।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु नञ्पदस्याऽभाववति लक्षणया अभाववान् अर्थः । तथा च **पटो** नेत्यस्य पटाभाववानित्यर्थः । वाक्यार्थस्तु पटाभाववान् घट इति । पटाभाववदभिन्नो घट इति यावत् । तथा च नामार्थयोरभेदेनैवाऽन्वय इति चेत्, न । **घटस्ये**ति । यद्यपि अभेदसम्बन्धेन पटाभाववति घटे अन्वयस्तथाऽपि पटे अभावस्याऽन्वयो न स्यात्, अभावस्यैकदेशत्वात्। यथा चैत्रस्य पितेत्यत्र पितृत्वस्य जनकपुंस्त्वार्थकत्वात् चैत्रपदस्य जनकत्वेऽन्वयः, न तु जनक-पुंस्त्वे । तथा च चैत्रस्य पितेत्यस्य चैत्रस्य जनक इत्यर्थः ।

गौः शुक्लेत्यत्र शुक्लाभिन्ना गौः इति शाब्दबोधः शुक्लाभेदवती गौरिति यावत्। तथा च शुक्लाभेदान्वयो गवि जायते। तस्य शुक्लाभेदान्वयस्याऽशक्यत्वात् तद् ज्ञानं न स्यात् ।

[३५] **कार्यत्वान्विते पदानां शक्ति**रिति। कार्यतावाचकपदसमभिव्याहृतं वाक्यं कार्यत्वविशिष्टं बोधयति । तथा हि-यजेतेति वाक्यं कार्यतावाचकं पदं विधिस्तत्समभिव्याहृतमेव योगो मत्कार्य(र्यं) इति बोधजनकम् । तथा च कार्यत्वविशिष्टे यागे यजेतेति वाक्यस्य शक्तिः ।

शास्त्राच्चन्द्रादिमहत्त्वप्रतीत्युत्तरमपि चन्द्रादिस्वल्पतायाः शास्त्रान्महत्त्वप्रतीत्या कृत्वा बाधानापत्तेरिष्टापत्तिरित्यत आह - **चरमे**[३६]ति ।

कार्यत्वान्विते शक्तिकल्पने गौरवं आवश्यकत्वेन प्रामाणिकत्वान्याय्यमेवेत्यत आह - **किञ्च**[३७] ।

[३८] **असंसर्गाग्रहे**ति । यत्र कार्यतावाचकं पदं नाऽस्ति तत्र नाऽन्वयबोधः। घटादिपदात् घटबोधस्तु घटपदं घटश्चैतदुभयोर्वाच्यवाचकभावरूपो यः असंसर्गस्तस्याऽग्रहणात् ।

भेदसम्बन्धेन नामार्थप्रकारकशाब्दे विभक्तिजन्योपस्थितिः कारणम् ।

---

३४. मुद्रिते पृ. २३१ । ३५. मुद्रिते पृ. १८० । ३६. मुद्रिते पृ. १८४ । ३७. मुद्रिते पृ. १८५ । ३८. मुद्रिते पृ. १८२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

